UNIVERSITY OF KERALA

SANSKRIT SERIES

No. 211

# STOTRASAMĀHĀRA

[ PART I ]

*Edited and Published by*

K. RAGHAVAN PILLAI

*B. A. (Hons.), Ph. D. (Lond.)*

CURATOR, Manuscripts Library.

PRINTED AT THE S. V. G. PRESS, TRIVANDRUM

1964/1139

*All rights reserved*]

[*Price* ~~Rs. 3~~ 3/40

S/407

केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २११

# स्तोत्रसमाहारः ।

## [प्रथमो भागः]

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६४/११३९

मूल्यं रूप्यकत्रयम्
3/50

JAWAHAR NAGAR DELHI 7

# INTRODUCTION

It has been our practice since 1955 to publish at least one stotra in each issue of the Journal of the Kerala University Oriental Manuscripts Library. As many of these stotras are of some literary merit and so deserve to be known better we have decided to publish these as a compilation so that they might be more easily available to students of sanskrit. The present is Part I to be followed by other parts.

The present work which forms No. 213 of the Trivandrum Sanskrit Series, is divided into two parts: Part A comprising of stotras attributed to Śrīkṛṣṇalīlāśuka and Part B comprising of stotras the authors of which are not known.

*Part A. 1. Bṛndāvanastotra*: This stotra is in praise of Bṛndāvana, the pauraṇic scene of the rāsakrīḍā of Kṛṣṇa. The work seems to be the same as a Bṛndāvanastuti published by Sri. M. Ramakrishna Kavi[1]. The edition is based on a manuscript obtained from Kāṭṭumāṭattu mana, Malabar (No. 17598) and a transcript obtained from Madras (No. 1253). First published in Vol. IX No. 3 of the Journal.

---

1. *Tirumalai Sri Venkatesa, Vol. I, pp. 225-30. Referred to by Dr. K. Kunjunni Raja, The Contribution of Kerala to Sanskrit Literature, p. 48.*

2. *Tribhuvanasubhagā*: This stotra in praise of god Dakṣiṇāmūrti has been published already as T. S. S. No. 2 under the title Dakṣiṇāmūrtistava. We have utilised Ms. No. 63 (17598) obtained from Kāṭṭumāṭattu Mana. The work was first published in Vol. X, No. 1 of the Journal.

3. *Kaustubhamālā:* This stotra gives a description of Viṣṇu. This also has been included in T. S. S. No. 2 under name Abhinavakaustubhamālā.[1] We have utilised the manuscripts mentioned above for this edition also. Published originally in Vol. XI No. 1 of the Journal[2].

4. *Adbhutastuti*: This stotra is in praise of god Śaṅkaranārāyaṇa. The name of the author given in the work is Vīrakṛṣṇalīlāśuka. The manuscript mentioned above has been utilised for this edition too. First published in Vol. X, No. 2 of the Journal.

---

1. *Shri. M. Krishnamachariar also refers to the work as Abhinakaustubhamālā, See, HCSL, p. 336*

2. *The colophons to the three works noted above in addition to giving the number of stanzas in each stotra and the name of the author refers to the work as Stotraratnasodara. This would indicate either that Stotraratna is another work of Līlāśuka or that all these stotras form members of a compilation entitled Stotraratna. Our present state of knowledge sheds no further light on either of these two possibilities and the question needs to be further examined.*

5. *Sarasvatīnakṣatramālā*: This stotra in praise of goddess Sarasvatī probably derives the name nakṣatramālā from the fact that the stotra alone consists only of 27 stanzas. The colophon mentions the work as consisting of 32 stanzas but the manuscript contains only 31. The edition is based on a manuscript (No. L.722) kindly lent to us by Sri. Raman Vasudevan Nambuthiry, Patiñjattiyeṭattu Mana, Kanayannoor. First published in Vol XI, No. 2 of the Journal.

6. *Nṛsiṁhanavaratnastava*: This stotra gives a vivid description of the Narasiṁhāvatāra of Viṣṇu. The stotra in itself consists only of nine stanzas; hence the name navaratnastava. We have utilised for the present edition a manuscript. (No. 18229) containing two slightly different versions of the work (Z5 & Z9) obtained from Aṭimittattu Mana, Chengannur. Published in Vol. XI, No. 4 of the Journal.

7. *Bālagopālāṣṭaka*: In this stotra is given a description of Kṛṣṇa from head to foot. The stotra alone consists of only eight stanzas. The edition is based on a manuscript contained in the codex mentioned above (18229. P.) First published in Vol. XII, Silver Jubilee Number of the Journal[1].

8. *Anubhavāṣṭaka*: This is a stotra addressed

---

1. *The work seems to be the same as a Kṛṣṇastuti mentioned by Dr. Kunjunni Raja. See, p. 48. op. cit.*

to Kṛṣṇa. We have utilised Ms. no. 18229 S for the edition. First published in Vol. XIII, no. 2 of the Journal.

All the above stotras are attributed to Śrīkṛṣṇalīlāśuka. The identity of Līlāśuka has been a subject of controversy among scholars but the concensus of present-day opinion seem to support the view that he belonged to Kerala. Whether all the stotras noted above are from the pen of the author of Kṛṣṇakarṇāmṛta is a moot question. It is important to note that all the stotras mention Kṛṣṇalīlāśuka as the author. We may, however, say that although literary cromparison is a very unsafe guide in determining the authorship of a work, it still cannot be denied that the style and diction of these works is far inferior to that of the Kṛṣṇakarṇāmṛta.

*Part B.* The stotras published in this part are all of anonymous authorship.

1. *Anantaśaktistava*: This is a fairly long stotra consisting of 104 stanzas. The work is very much tantric in content and many of the mysterious formulae [bījamantra] employed by tantrics are incorporated in it. The author himself makes it clear that he has followed the kauḷa system of tantra in composing the work. The edition is based on a Ms. [No. C. O. 1278] available in this library. Originally published in Vol. X, no. 3 of the Journal.

2. *Kāmākṣīstava*: This is a beautiful stotra composed in a high-flown style in praise of goddess

Sarasvatī, most probably goddess Kāmākṣī of the Kāñcīpuram temple. Based on a Ms. [No. L. 103] in this Library. First published in Vol. VIII, No. 4 of this Journal.

3. *Muktipurasthadevīstotra*: This is in praise of the goddess of the Muktisthala temple (Mukkola temple in Malabar). We have utilised Ms. No. 804B of this Library for preparing the edition. Published first in Vol. VIII, No. 3 of the Journal.

4. *Śrīmadhurāpurīstuti*: This stotra praises the city of Mathurā, the pauranic capital of the Yādava Kings. Based on a Ms. (No. 375) secured from Kūṭallūr Mana, Malabar. First published in Vol. IX, No. 4 of the Journal.

5. *Āryāśataka*: The Āryāśataka is in praise of the goddess of the Śārṅgodyāna temple (Cāmakkāvu temple near Pandalam, Chengannur Taluq) is based on a Ms. (No. 16620 B) in this library. Originally published in Vol. XIII, No. 1 of the Journal.

6. *Kalyāṇastava*: This stotra is to a certain extent tantric in content. The edition is based on a Ms. in this Library. First published in Vol. XIII, No. 3 of the Journal.

7. *Keśavāṣṭaka*: This short stotra is in praise of god Kṛṣṇa. The edition is based on a Ms. (18229 E) availaole in this Library. Published originally in Vol. XII, No. 4 of the Journal.

8. *Śrīkṛṣṇadaṇḍaka:* This is a stotra in the daṇḍaka variety of prose and is noteworthy for the melody of its diction. Ms. No. 154 of this Library has been used for this edition, First published in Vol. IX, No. 1 of the Journal.

9. *Kumārastava:* This stotra consisting of 45 verses is in praise of god Subrahmaṇya. A noteworthy feature of this poem is that the stanzas are arranged in the alphabetical order. First published in Vol. X, No. 4 of the Journal.

10. *Suvarṇamuktāvalīstuti:* This stotra in praise of goddess Durgā is similar to the Kumārastava in that here too the stanzas are arranged in alphabetical order. Both these stotras exhibit a certain similarity in poetic diction too. Further both these works are found in the same codex (No. T. 68). These facts lead us to think that both these works may be from the pen of a single author of whom we know nothing at present. The suvarṇamuktāvalīstuti was published in Vol. XI, No. 3 of the Journal.

I have been assisted in the publication of these works by Shri. A. Ramachandra Sastri and Shri. V. G. Namboodiry, Research Officers and Shri. M. Madhavan Unni and Shri. C. P. M. Namboodiry, Assistant Research Officers.

*10 - 3 - 1964*
*Trivandrum*

*K. Raghavan Pillai*
CURATOR

श्रीकृष्णलीलाशुकमहाकविमुनिविरचितं

## *वृन्दावनस्तोत्रम्

वाञ्छिताय भवतां विजृम्भतां मत्तहस्तिवदनं महन्महः ।
लाञ्छितं ललितभृङ्गसुन्दरीलेखया च शशिलेखया च यत् ॥ १ ॥

देवी सरस्वती स्वैरं सेवावसरकाङ्क्षिणी ।
देवदेवमियं धन्या सेवतां देवकीसुतम् ॥ २ ॥

---

* This Stotra has been found in a palm leaf manuscript, marked क, obtained from Pāṭṭumāḍattu Mana, Malabar. Another copy, marked ख, (Transcript no. 1253) has been obtained from Madras.

As is evident from the last stanza the author of this Stotra is Kṛṣṇa Līlāśuka, the celebrated Vilvamaṅgaḷattu Svāmiyār, a saintly poet of Kerala. His works include Śrī Kṛṣṇa Karṇāmṛta, Śrī Cihna, and Puruṣakāra, commentary of Daiva, a grammatical treatise. Since Sāyaṇācārya who lived in the latter half of the 14th century A. D. quotes Puruṣakāra in his Dhātuvṛtti, Līlāśuka has to be considered to belong to an earlier period. (See Kerala Sāhitya Caritram by Uḷḷūr Vol. I. p. 152—161)

Mahākavi Uḷḷūr is of opinion that Līlāśuka was a native of Kerala and that this Stotra was written while the author was in Vṛndāvana.

अस्ति वृन्दावनं नाम वनं भुवनपावनम् ।
वृन्दया(नश्च? नन्द)सूनोश्च कृपया परिरक्षितम् ॥ ३ ॥

यत्र गावश्च गोपाश्च गोप्यश्च तरवश्च तम् ।
अवतीर्णाः सह स्वर्गात् सेवन्ते स्म जगत्प्रभुम् ॥ ४ ॥

यत्र रामश्च कृष्णश्च रेमाते बाललीलया ।
निरन्तरपरीरम्भानिर्भरोद्भूतहर्षया ॥ ५ ॥

यत्र दृष्ट्वा विषास्पृष्टं कदम्बममृतोक्षितम् ।
स्पृष्ट्वा कृष्णेन निर्भीभ्यां पद्भ्यां पेदे फणिह्रदे ॥ ६ ॥

यत्र कालियनागस्य मध्यमं भुवनोत्तमम् ।
फणं चकार भगवान् पादाम्बुरुहलीलया ॥ ७ ॥

यत्र द्वादश मार्ताण्डाः शीतार्त कालियंह्रदे ।
कृष्णं क्षणमुपस्पृश्य करैर्जग्मुः कृतार्थताम् ॥ ८ ॥

यत्र द्वादश मार्ताण्डाः प्रतापं वीक्ष्य शार्ङ्गिणः ।
तत्क्षणानिव काङ्क्षन्तः सेवन्तेऽद्यापि तैः करैः ॥ ९ ॥

यत्र गोपीसहस्रेण खेलमानं सहस्रशः ।
प्रेक्ष्य देवं सहस्राक्षः सहस्राक्षफलं ययौ ॥ १० ॥

यत्र त्रिभुवनाभोगसुभगां तनुमुद्वहन् ।
धन्यैरद्यापि गोविन्दो लोचनैः परिचुम्ब्यते ॥ ११ ॥

---

१. यं ह्रदे. Mss.

यत्र केशिनमाक्रम्य वामपादेन केशवः ।
वामहस्तेन चाकृष्टैः प्राणैरद्यापि खेलति ॥ १२ ॥

इति यत्र विचित्राणां विष्णोर्बाल्यमुपेयुषः ।
पवित्राणि चरित्राणि गीयन्ते मुनिपुङ्गवैः ॥ १३ ॥

यत्रोद्गीतं गोपिकानां हिमाद्रौ[1] श्रुत्वा शम्भुर्ध्यानभङ्गानुपेत्य ।
गुप्तस्तृप्तैः[2] कृष्णमैक्षिष्ट[3] दीर्घं शृण्वन् गीतं भाति गोपीश्वराख्यः ॥ १४ ॥

किमत्र बहुनोक्तेन निश्रेयसविधिः स्वयम् ।
निश्रेयसवनं गत्वा यत्र रेमे रमासखः ॥ १५ ॥

तदेतदमृतस्यन्दि वृन्दावनमहो दृशोः ।
चिरोत्कण्ठितमागम्य जन्मनः फलमाप्नुमः ॥ १६ ॥

वन्दे वनमिदं मूर्ध्ना यत्र चित्रं जगत्प्रभोः ।
प्राप्य प्रतिपदं रेजे स्थलपद्मपदं पदम् ॥ १७ ॥

अपि वा भुवनोल्लङ्घि सौभाग्यं वीक्ष्य चक्रिणा ।
पादमुद्रापदेशेन यत् चक्रेणात्मसात्कृतम् ॥ १८ ॥

जगज्जन्मस्थितिलया लीला यस्य जगत्प्रभोः ।
तस्यास्य कृष्णदेवस्य लीलोद्यानमिदं कियत् ॥ १९ ॥

वृन्दादेव्या बद्धरक्षं तदेतद् वृन्दारण्यं पुण्यभाजो भजन्ते ।
गोपीरूपैर्यत्र लक्ष्मीसहस्रैः देवः स्वैरं सेवितो दैवतैश्च[4] ॥ २० ॥

---

१. द्रेः ख. २. सं. ख. ३. ष्णमीक्षिष्ट. Mss. ४. देव. Mss.

वन्दे भगवतीं वृन्दां वनस्यैतस्य रक्षिकाम् ।
यत्र दत्तभरः स्वैरं चिक्रीडति जगत्प्रभुः ॥ २१ ॥

वन्दे बृन्दावनेन्द्रस्य विश्वनाथस्य शैशवम् ।
वैभवोद्ग्रन्थिमङ्गल्यकटाक्षोक्षितदिङ्मुखम् ॥ २२ ॥

वन्दे कन्दर्पसाम्राज्यवृन्दावनवनेचरम् ।
वृन्दैरिन्दीवराक्षीणां बन्दीकृतमितस्ततः ॥ २३ ॥

तावकं भगवन्! भातु तत्त्वमस्तमितोपमम् ।
निस्तरङ्गनिरातङ्कनीरन्ध्रसुखसङ्कुलम् ॥ २४ ॥

भगवान् पुण्डरीकाक्षो भासतां मम मानसे ।
मृगलाञ्छनवंशस्य मणिलाञ्छनतां गतः ॥ २५ ॥

मधुराभिजनं धाम मधुराधरपल्लवम् ।
हृदयङ्गममभ्येतु हृदयं गाळितोपमम् । २६ ॥

देवकीवसुदेवाभ्यां दत्त्वा नेत्रोत्सवं सकृत् ।
ददौ नन्दयशोदाभ्यां यत् तत्पुत्रोत्सवोत्सवान् ॥ २७ ॥

तदेतदवलिह्यादौ बाललीलाः सहस्रशः ।
अनुचुम्बितकैशोरकेलि खेलतु मे हृदि ॥ २८ ॥

देवः क्रीडन् गोपगोपीसहस्रैः दत्तास्थाने गोसहस्रैः परीतः ।
कल्पच्छायः कल्पकश्रीसहस्रैः गायन् वेणुं गाहतां मानसं मे ॥ २९ ॥

१. वन्दितं तमितस्ततः ख.

वृन्दारण्ये पण्यगोपाङ्गनाभिः कूले कूले वल्लहर्म्ये लताभिः ।
क्रीडन् कृष्णः कृष्णया बद्धदूरं वीचीहस्तैर्भातु बद्धाञ्जलिर्मे ॥ ३० ॥

अविशङ्कमनङ्गसङ्कुलाभिर्वनिताभिर्विनताभिरात्तरासः ।
कमलारमणः किशोरवेष परिपुष्यन् मम चित्तमभ्युदेतु ॥ ३१ ॥

मध्ये मध्ये कृष्णमाणिक्यमिश्रा माला काचिद्वल्लवीनां सहस्रैः ।
चित्ताभोगैर्भोगिनां धन्यधन्यैः जीयादेषा दीर्घमाघ्रायमाणा ॥ ३२ ॥

व्योमाभोगे विस्मयाविष्टनेत्रैः सार्धैर्दिव्यैर्निर्निमेषं निषेव्यम् ।
गोपीलक्षैः क्लृप्तरासं समन्ताद् गोपं कश्चित् पञ्चबाणोऽप्युपास्ते ॥३३॥

चपलं भवतश्चरित्रमेतत् कमला केलिभुजान्तरे निलीना ।
मुनयश्च मुहु(र्मुहु)र्मुरारे! विहरन्ते तव चापलं गृणन्तः ॥ ३४ ॥

मदान्धगोपीजनवल्लभाय नमोऽस्तु नारायणचापलाय ।
यद्वीक्ष्य लक्ष्मीर्भुजमध्यलीना हा हन्त लीलावसरप्रतीक्षा ॥ ३५ ॥

त्वयि देव! दयाम्बुधे! मुरारे! निखिलं न्यस्य भरं गुरुं गतान्ध्यः ।
विहराणि विजृम्भमाणतत्त्वश्चरणाम्भोरुहचुम्बनोत्सवेन ॥ ३६ ॥

नन्दव्रजाभरणनीलमणिप्रवाल!
नाथ! त्वदीयचरणाम्बुजचुम्बनान्धः ।
पुण्यैः पुरा परिणतैः परिरम्यमाने-
र्भूयो भवेय भगवन्! भुवनान्तरेऽपि ॥ ३७ ॥

जीयाज्जगत्त्रयीकान्त! कृपार्णव! जयार्णव! ।
जिग्ये फणिफणा येन पादेन च करेण च ॥ ३८ ॥

न केवलं भवान् देव! पोतो नन्दयशोदयोः ।
किन्तु सिन्धुममुं घोरमुत्तरीतुं च मादृशाम् ॥ ३९ ॥

भुवनेश्वरमालम्बे तं त्वां वृन्दावनेश्वरम् ।
स्मरतामममृतोद्गारिकैशोरकदयाद्भुतम् ॥ ४० ॥

वृन्दारण्ये वीरगोपालबालं वारं वारं वारितोदात्तदैत्यम् ।
नाकाल्लोकान्निष्पतत्पुष्पवीचीधारावर्षस्मेरमौलिं स्मरामः ॥ ४१ ॥

भजतां हृदयाम्भोजभागधेयमुपास्महे ।
यजतामधिदैवं यद् यच्च व्रजमृगीदृशाम् ॥ ४२ ॥

पङ्केरुहप्रतिभटं पदपल्लवेन
पारं गतं त्रिभुवनाद्भुतविभ्रमाणाम् ।
पिञ्छावतंसपरिलाञ्छितकेशहस्तं
पीताम्बरं किमपि धाम वयं भजामः ॥ ४३ ॥

यशोदाया यशःपुञ्जमञ्जनाभमुपास्महे ।
विस्मयं यत्र विन्दन्ति वृन्दावनमृगा अपि ॥ ४४ ॥

वृन्दावनचरं देवं वृन्दादृतपदाम्बुजम् ।
नन्दात्मजमुपासीना नन्दाम शरदः शतम् ॥ ४५ ॥

न हन्त तपसा सिद्धा न च मुग्धा व्रजाङ्गनाः ।
तदिह त्वं दृशोः पात्रं भवितुं देव! के वयम् ॥ ४६ ॥

पश्येम तव विश्वेश! वृन्दावनविहारिणः ।
वैभवं शैशवोद्गन्धि सिन्धुकन्यास्तनादृतम् ॥ ४७ ॥

कस्तूरिकाकर्बुरकण्ठकाण्डं कञ्चित् किशोरं कमलायताक्षम् ।
विस्तारिणीभिः स्मितचन्द्रिकाभिर्विलोचनं लोचनयोर्वहामः ॥ ४८ ॥

गोगोपीगोपलक्षैः परिवृतमभितः कल्पकच्छायशीतं
गीतं वंश्या दुहानं त्रिदशपुरमहापुष्पवृष्टिप्रहृष्टम् ।
ऊर्ध्वाधस्तिर्यगाशामखशतभरितैर्भाग्यभाजां परार्धै-
र्दैवं लेलिह्यमानं त्रिभुवन ......... न्दीप्यतां नेत्रयोर्मे ॥ ४९ ॥

चपला सफला ममास्तु दृष्टिश्चतुरं वीक्ष्य चतुर्भुजस्य बाल्यम् ।
अधरामृतवाहिवेणुनादैरधिवृन्दावनमिन्दिरावलेह्यम् ॥ ५० ॥

इन्दीवरदलश्याममिन्दिरानयनोत्सवम् ।
वृन्दावनचरं बालं विन्दे[1]महि कथं दृशा ॥ ५१ ॥

मन्दस्मितामृतार्द्रेण वदनेन मनोहरम् ।
कन्दर्पतातकैशोरं कदा मम दृशोः पदम् ॥ ५२ ॥

नन्दव्रजाङ्गनालक्षनयनोत्सवनिंसितम् ।
कन्दर्पतातसौभाग्यं कदा मम दृशोः स्पृशे ॥ ५३ ॥

साधारणपदातीत! राधारणरसादृत! ।
नारायण! भवद्बाल्यपारायणपरे दृशौ ॥ ५४ ॥

कदा नु कमलाबन्धो! वृन्दावनविलासिनः ।
विलासि वदनाम्भोजं विलिह्य सफले दृशौ ॥ ५५ ॥

---

१. वन्दमहि Mss.

सफले चपले कृष्ण! कदा तव मदालसम् ।
वदनाम्बुरुहं वृन्दावनेऽप्याचुम्ब्य मद्दृशौ । ५६ ॥

वृन्दावने विहरतस्तव दिव्यवेषं
दृग्भ्यां निपातुमतिलम्पटयोर्दृशोर्मे ।
यावत् प्रशस्यसि(?) जगत्त्रयकान्त! कृष्ण!
तावत्तवानुचरणं चरणे करोमि ॥ ५७ ॥

त्वत्पादपङ्कजरजःपरिचारकस्य
किं नाम किङ्करजनस्य जगत्यसाध्यम् ।
दिव्यां दृशं दिश यया किल दिव्यवेष-
मन्तर्बहिस्तव विलिह्य भवन्ति धन्याः ॥ ५८ ॥

यद्वा चित्तपथे विचिन्त्य भवतो भक्तैकचिन्तामणे!
भावं भावनया कयापि भगवन्! प्राप्स्याम्यभीप्सास्पदम् ।
किं वा केवलया तवैव कृपया हे कृष्ण! कृष्णासख!
स्वामिन्! कामदुघैः कटाक्षविभवैः सार्धं लभे लिप्सितम् ॥ ५९ ॥

वृन्दावनव्यसनिनस्तव देव कृष्ण
लीलाशुकेन रचितं निचितं रसौघैः ।
प्रत्यक्षरं परिदुहन्मधु कर्णयोस्ते
स्तोत्रं तदेतदनिशं विलिहन्तु धन्याः ॥ ६० ॥

इति श्रीकृष्णलीलाशुकमहाकविमुनिविरचितं
षष्टिसङ्ख्यं स्तोत्ररत्नसोदरं नाम
वृन्दावनस्तोत्रं समाप्तम् ॥

---

॥ श्रीः ॥

श्रीकृष्णलीलाशुककविमुनिविरचिता

# त्रिभुवनसुभगाख्या स्तुतिः* ।

दुर्वारगर्वभरदूरविजृम्भमाण-
मोहान्धकारपरिपाटनबद्धदीक्षः ।
शश्वद्भृशप्रविसरत्सहजप्रकाश-
कोशप्रभुर्जयति कोऽपि वटस्थलीशः ॥ १ ॥

अग्नीन्दुभानुभिरशेषजगत्प्रकाशै-
रासादितं नयनभावमवेक्ष्य वेदाः ।
यद् वेदयन्ति महसां तमसां च दूरं
तद् दैवतं वटतटीदयितं भजामः ॥ २ ॥

कल्पद्रुमैरलमभीभिरनीश्वराणा-
माराधनीयपदवीमधिगम्य रम्यैः ।
तेऽमी वयं परिवृतं परमेश्वरेण
तं वा वटं तमपि वा विभुमाश्रयामः ॥ ६ ॥

---

* त्रिभुवनसुभगाभिधानेयं दक्षिणामूर्तिस्तुतिः मलबार् प्रदेशवर्तिनः "काट्टुमाटनाम्नः" नम्पूतिरिभवनात् सम्पादिते ६३ अङ्काङ्किते मलयाळलिपिलिखिते तालपत्रग्रन्थे विद्यमानासु श्रीकृष्णलीलाशुककृतिषु अन्यतमा । श्रीमता एम्. कृष्णमाचार्येण स्वकीये "क्लासिक्कल् सान्स्क्रिट् लिट्रेच्चर्" नामकसंस्कृतसाहित्यचरित्रे श्रीकृष्णलीलाशुककृतिषु मध्ये परिगणिता चेयं परिदृश्यते दाक्षिणामूर्तिस्तुतिः ।

षड्वर्गदुर्गपरिलङ्घनकोविदेन
चित्तेन यत्र सुचिरं चपला मुनीन्द्राः ।
तत् तादृशं मधुरिमैकरसोर्मिधाम
श्रीमद्वटाश्रयमुपाश्रयितुं यतध्वम् ॥ ४ ॥

इन्द्रादयो यदरुणाङ्घ्रिरजःकणेन
राज्यश्रियं त्रिभुवने भृशमुद्वहन्ति ।
व्याघ्रत्वचा परिभृतस्य हि तस्य भिक्षोः
व्याख्याश्रियं वटतटावसथस्य वन्दे ॥ ५ ॥

नृत्यन्ति यच्छिरसि नाकनदीप्रवाहा-
स्तद्भ्रातरश्च रसने वचसां प्रपञ्चाः ।
चित्ते दयाश्चरणरेणुषु वाञ्छितार्थाः
पायादयं वटतरुप्रणयी विभुर्नः ॥ ६ ॥

आम्नायवीचिसहचारिवचःप्रचारै-
रासारसारसरणीमधिरोहमाणैः ।
आसिच्य मानसमनन्यधियां मुनीना-
माद्यं वटं च विहरन् गिरिशोऽवतान्नः ॥ ७ ॥

मन्दस्मितेन च मनोहरमुद्रया च
व्याख्यानवीथिविभवैश्च विजृम्भमाणैः ।
व्याख्यायमाननिजसत्त्वरसानुभूति-
र्विश्वेश्वरो वटतटप्रकटोऽवताद् वः ॥ ८ ॥

ऊर्ध्वं दिवो भवमधश्च भुवो भवन्तं
तिर्यक् च पर्यवसितेतरवैभवाङ्गम् ।
बाढं कयापि कृपया वटवृक्षमूले
मन्मानसे च विहरन्तमनन्तमीडे ॥ ९ ॥

रक्ताङ्गुलीयुगळनर्तितचारुमुद्रं
संसारवृक्षपरितक्षपरश्वधाढ्यम् ।
क्रीडागृहीतमृगलाञ्छनलाञ्छनार्द्रं
हस्तेन जानुनिहितेन जगन्मनोज्ञम् ॥ १० ॥

तत्तत्फणामणिविभूषणभासुरेण
भाग्याधिकेन फणिना कृतयोगपट्टम् ।
वामेतराङ्घ्रितलकान्तिकरम्बितेन
वामोरुणा गिरिसुताहृदयं हरन्तम् ॥ ११ ॥

इन्दोः कलां खलु जटापटले वहन्तं
विश्वाः कला वचनवीचिषु चारयन्तम् ।
देव्या वृतं गिरिजया मुनिभिश्शुकाद्यैः
तं विश्वतो विशदमाद्यगुरुं प्रपद्ये ॥ १२ ॥

त्रिभुवनसुभगेयं दक्षिणामूर्तिमूर्तौ
भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतु जयतु देवी भारती जीवलोकः
श्रवणहृदयजिह्वाजन्मसाफल्यमेतु ॥ १३ ॥

इति श्रीकृष्णलीलाशुककविमुनिविरचिता
त्रिभुवनसुभगा समाप्ता ॥

॥ श्री ॥

# ॥ कौस्तुभमालास्तोत्रम् ॥

## श्रीकृष्णलीलाशुकमुनिविरचितम् ।

[ स्तोत्रमिदं मलबार् देशवर्तिनः 'काट्टुमाट'नाम्नो नम्पूतिरि-भवनात् सम्पादितात् ६३तमाङ्काङ्कितात् तालपत्रग्रन्थादुद्धृतम् ।

**श्रीकृष्णलीलाशुकमुनिविरचितानि वृन्दावनस्तोत्रत्रिभुवनसुभगास्तुत्यद्भुतस्तुतिनामकानि** स्तोत्ररत्नानि ग्रन्थालयादस्माद् यथाक्रमं Vol. IX No. 3, Vol. X No. 1, Vol. X No. 2 इत्येतेषु संस्कृतत्रैमासिकग्रन्थेषु प्रकाशितचराणि । इदं च प्रकाश्यमानं **कौस्तुभमाला**-भिधं स्तोत्रं श्रीकृष्णलीलाशुकीयेष्वन्यतमं विष्णुपादादिकेशान्तवर्णनपरमभिनवभावनाकान्तिभासुरं सुकृतां हृदयङ्गमं जेजीयते । एतत्स्तोत्रावसाने दृश्यमानाद् "इति श्रीकृष्णलीलाशुकमुनिविरचिता सप्तचत्वारिंशत्सर्गस्तोत्ररत्नसोदरा कौस्तुभमाला समाप्ता" इति वाक्यान्मुनिकविनानेन सप्तचत्वारिंशत्सर्गात्मकः स्तोत्रग्रन्थो निरमायीत्यभ्यूहितुं शक्यम् ॥ ]

लक्ष्मीश्च कौस्तुभश्चेति यद् रत्नद्वयमुद्रितम् ।
तन्नः कामदुघं भूयात् तेजस्त्रैलोक्यमङ्गलम् ॥ १ ॥

यत्र साम्राज्यचिह्नानि यमिनां हृदयैः सह ।
श्रीश्च जाग्रति तज्जीयाच्छ्रीश ! त्वच्चरणाम्बुजम् ॥ २ ॥

यच्चादिकवयो व्यासप्रमुखाः सपितामहाः ।
भागीरथीसरस्वत्योः प्रवाहप्रभवं विदुः ॥ ३ ॥

किं ब्रूमः प्रपदं देव! यस्य प्रतिनिधावपि ।
पृष्ठे जरठकूर्मस्य जगती प्रतितिष्ठति ॥ ४ ॥

तेऽमी नखेन्दवो देव! यान् हि नाभीसरोजभूः ।
पुरा सिसृक्षितस्येन्दोः प्रतिमानान्यमन्यत ॥ ५ ॥

जयतां जगतां नाथ! गुल्फावुल्फुल्लविभ्रमौ ।
यावनुस्मरतां गाढमुन्नातिर्न तथानयोः ॥ ६ ॥

तव देव! पदं धन्या मणिभूषणमण्डली ।
वेषान्तरेण वेदान्तवाणीव विनिषेवते ॥ ७ ॥

निर्वाणसंज्ञकं देव! तव तत् परमं पदम् ।
चिरात् प्रविशतां शङ्के जङ्घे मङ्गल्यतोरणे ॥ ८ ॥

एते ते जानुनी नाथ! यशोदाङ्गणरङ्गिणी ।
लक्ष्मीः करीषगन्धास्यच्छलाज्जिघ्रति ये स्थिता ॥ ९ ॥

तावूरू जयतां यौ किं द्वौ (भ? क)रौ स्मरहस्तिनः ।
इति पृष्टः प्रतिप्रश्ने नैव देव! श्रियञ्जये (?) ॥ १० ॥

त्वत्कटीतटसौभाग्ये स्वामिन्! नास्मद्गिरां गतिः ।
लक्ष्मीवसुन्धराधन्यमनीषास्तत्र जाग्रतु ॥ ११ ॥

कामरूपैव देव श्रीर्येयं वक्षस्तटे स्थिता ।
कटीतटेऽपि कामान्धा भाति पीताम्बरात्मना ॥ १२ ॥

काञ्चीयं काञ्चनी नाथ! भाति रत्नप्रभोत्कटा ।
मुग्धयेव कृता लक्ष्म्या मदान्धस्मरशृङ्खला ॥ १३ ॥

सेयं नाभी यया देव! शङ्खः सङ्घृष्य गर्जति ।
लक्ष्मीविरिञ्चयोः स्पर्धां वस्तुं यत्सरसीरुहे ॥ १४ ॥

वलित्रयमिदं वन्दे जगत्त्रयमनोहरम् ।
माधुर्यवारिधेर्धत्ते वीचीनां विभ्रमाश्रियम् ॥ १५ ॥

श्रीमानुदरबन्धोऽयं श्रियं देवस्य पुष्यति ।
कान्तिसिन्धौ दृशोः क्रीडाप्लवः क्लृप्त इव श्रियः ॥ १६ ॥

लोकैकनाथ! रम्येयं रोमराजिर्विराजते ।
क्लृप्तेव प्रथमं लक्ष्म्या वक्षोहर्म्याधिरोहणी ॥ १७ ॥

श्रीवत्सः श्रीनिधे! सोऽयं श्रियं कामपि पुष्यति ।
यः पङ्कजापदाम्भोजक्रीडाचिह्नानि निह्नुते ॥ १८ ॥

चकास्ति कौस्तुभः सोऽयं तव देव! भुजान्तरे ।
पयोधिराजकन्यायाः हर्म्यदीप इवार्पितः ॥ १९ ॥

नानारत्नसहस्राणि नाथ! वक्षसि जाग्रति ।
रत्नाकरसुतोद्वाहयौतकानीव कानिचित् ॥ २० ॥

वैजयन्तीमिमां देव! मन्येऽसाधारणीं ध्रुवम् ।
ममत्वपात्रं भृङ्गाणां देवस्य मदनस्य च ॥ २१ ॥

भान्ति ते जगतां नाथ! भुजा भूषणभूषणाः ।
जगद्भारोद्वहैश्चक्रे यैश्चक्रादिभरश्रमः ॥ २२ ॥

पाणयश्चक्रपाणे ते भान्ति भक्ताभयप्रदाः ।
येषां दक्षिणतैवासील्लक्ष्मीपाणिग्रहोत्सवे ॥ २३ ॥

लोकपालललाटेषु लक्ष्म्याश्च स्तनमण्डले।
लेखारसज्ञैस्तैः पञ्चशाखैः पञ्चशरः स्मरः ॥ २४ ॥

तेऽमी कररुहा देव! येषां विक्रमविभ्रमः ।
कमलाविपुलातुङ्गस्तनेषु हृदि च द्विषः ॥ २५ ॥

कम्बुग्रीवामिमां नाथ! कथं नु कथयामहे ।
लक्ष्मीकङ्कणमुद्राभिर्यात्र रेखा स्थितिं जहौ ॥ २६ ॥

कर्णपाशाविमौ देव! स्फुरन्मकरकुण्डलौ ।
अवशायत्प्रवेशान्तन्धामृगामृदृशां दशम् (?) ॥ २७ ॥

तौ कपोलाविमौ देव! यावुदीक्ष्य रमाभुवौ ।
मन्ये नान्यावमन्येतां मङ्गल्यमणिदर्पणौ ॥ २८ ॥

अपरं देव! बिम्बोष्ठममृतं भुवनोत्तरम् ।
आहुर्विपर्ययेणात्र प्रमाणं प्राणवल्लभे ॥ २९ ॥

तवाधरसुधा सेयं यां निपाय पयोधिजा ।
ततः प्रभृति वै देव! सुधान्तरमुपेक्षते ॥ ३० ॥

दन्तपङ्क्तिरियं देव! दशनच्छदराञ्जिता ।
मुखेन्दुकान्तेराधत्ते मुक्तावालिपरिक्रियाम् ॥ ३१ ॥

देव! त्वन्नासिकावज्रकुसुमं प्राप्य मन्मथः ।
कुसुमान्तरसम्पत्तिं मन्यते पङ्क्तिपूरणम् ॥ ३२ ॥

अनयोः पुण्डरीकाक्ष! नेत्रयोः पुण्डरीकयोः ।
मुखेन्दुकान्तिः सरसी मूलभूमिस्तु चिन्त्यताम् ॥ ३३ ॥

देव! क्रीडाकटाक्षाय भूयो बद्धोऽयमयमञ्जलिः ।
कामं न केवलं लक्ष्म्या यो दुग्धे जगतामपि ॥ ३४ ॥

तदेतद् वदनं देव! माधुर्यमिव मूर्तिमत् ।
वीक्ष्य सेवाच्छलाद् गूढनासाग्राङ्गुलि य(ञ्ञ? ज्ञ)गत् ॥ ३५ ॥

यत्र स्वयंवरे स्पर्धा लक्ष्मीकान्त्योः किलाभवत् ।
वेदाश्च केलिजल्पाश्च सौभ्रात्रं यत्र बिभ्रते ॥ ३६॥

पद्मचन्द्रमधुज्योत्स्नाविवादान्ध्येष्वनादिषु ।
देव! त्वद्वक्त्रबिम्बस्य स्मितस्य च किमुच्यताम् ॥ ३७ ॥

कस्तूरीतिलकामोदे लला(ट?टे)भ्रमरैर्हृते ।
देव! त्वद्भ्रूलताभृङ्गचमूः पाति मुखाम्बुजम् ॥ ३८ ॥

अष्टमीन्दुनिभस्यास्य ललाटाष्टापदस्य ते ।
यौवराज्यपदं देव! मुखेन्दुरनुमन्यताम् ॥ ३९ ॥

नाथ! धम्मिल्लभारेऽस्मिन् नानासौरभ्यनिर्भरे ।
भृङ्गैर्लक्ष्मीकटाक्षाणां भृङ्गं भाति मृधं मुधा(?) ॥ ४० ॥

नाथ! त्वामेव मन्येऽहमचलं भुवनोन्नतम् ।
अनुल्लङ्घ्यैव यं मौलिच्छलादर्कोऽपि सेवते ॥४१ ॥

देव! त्वद्भक्तिरथवा त्वत्तोऽपि द्विगुणोन्नता ।
जितस्त्वमसि यद्राजा प्रह्लादेन रणेऽपि हि ॥ ४२ ॥

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४३ ॥

तदिदं त्वद्वपुर्देव! नीलं निर्वृतितन्मयम् ।
कान्तिभूषाशताभोगकर्बुरं भातु मे मुहुः ॥ ४४ ॥

तत्त्वं परं किमपि यत् स्वरसावभासि-
सान्द्रप्रमोदलहरीभरिताखिलाशम् ।
कैवल्यविग्रहमिदं तदनुग्रहार्थ-
मस्मादृशां जयति तादृगुपात्तमूर्तिः ॥ ४५ ॥

अभिनुवतमनु(?) भृशं दृशावभिनवकौस्तुभमालयानया ।
भुवनविभुमभूतपूर्वया पुलकपरम्परया च भूषितम् ॥ ४६ ॥

श्रीकृष्णकेलिशुकवाङ्मयवीचिमाला-
लीलारसज्ञललितश्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च मुक्ततां सुचिराय जीयात् ॥ ४७ ॥

इति श्रीकृष्णलीलाशुकमुनिविराचि(तमा?ता)
सप्तचत्वारिंशत्सर्ग(:?)स्तोत्ररत्नसोदरा
कौस्तुभमाला
समाप्ता ॥

---

॥ श्रीः ॥

श्रीकृष्णलीलाशुककविमुनिविरचिता

# अद्भुतस्तुतिः* ।

१

यदनयोर्दृढं नयनयोः प्रियं किमिदमुद्भटं त्रिजगदद्भुतम् ।
हरिणमेकतो हरितमेकतः करुणया पुनः किमपि सर्वतः ॥

२

कमलागिरिजाकपोलबिम्बप्रतिबिम्बीभवता मुखाम्बुजेन ।
अवलोकितविभ्रमेण जातस्मितमालोकय लोकनाथवेषम् ॥

३

नाथश्च तातश्च सुरापगाया लोपश्च लाभश्च विलासयोनेः ।
श्वेतश्च नीलश्च स एष वेषः कथं मिथः सङ्गतिमेति देवः ॥

४

अनन्तकल्पान्तभुवां सुधाभुजां कपाल(धा?दा)म्नः श्रियमन्तरान्तरा ।
वितन्वतीभिस्तुलसीभिरद्भुतं विराजते देव भवद्भुजान्तरम् ॥

५

उरसि काश्चिच्छिरसि काश्चिद्वहसि चान्ये वामसव्ये ।
इति विचित्रं चतसृभिस्त्वं कथमिवैकः क्रीडतीशः ॥

६

शय्येति भूषेति च संशयाने भुजङ्गयाने हरिशङ्करो वः ।
विहस्य पाथोधिगिरीन्द्रकन्यास्तनेषु पायाच्छयितः कृतार्थः ॥

७

निद्रान्तराले निजवल्लभाभ्यां सीमानमुल्लङ्घ्य दृढोपगूढः ।
मुग्धावबोधे चकितेक्षणाभ्यां व्रीलेक्षितोऽव्याच्छिवकेशवो वः ॥

---

* हरिहरात्मकं भगवन्तं शङ्करनारायणमधिकृत्य विरचितमिदम् 'अद्भुतस्तुति'-नामकं स्तोत्ररत्नं मलबार् देशवर्तिन 'काट्टुमाट'नाम्नो नम्पूतिरिभवनात् सम्पादिते ६३ अङ्काङ्कित कैरलीलिपिलिखिते तालपत्रग्रन्थे विद्यमानेषु श्रीकृष्णलीलाशुक-कविमुनिकृतेषु स्तोत्ररत्नेषु अन्यतमम् ।

८

हरतु वो दुरितमब्धिनन्दनातुहिनशैलतनयास्तनाङ्कितम् ।
अपिच मेचकविपाण्डुविभ्रमं हरिहराकृति मनोहरं महः ॥

९

गलगतगरलाङ्कुरेण भूयः प्रविसरतेव समग्रनीलकण्ठम् ।
अपिच निचितमेचकार्धगात्रं हरिहरमाश्रय विश्वतोऽवदातम् ॥

१०

मातेति मत्वा तव वामभागं मन्ये गुहः स्तन्यनिपानकामः ।
(पक्षे?वक्षो) मृशन् देव विहस्य मात्राप्यन्वीक्ष्यते विघ्नकृतापहासः॥

११

स्फटिकमणिशिलाविलासचोरं
मरतकक्रान्तिमदापहारशूरम् ।
परिकपिलदृशं पयोरुहाक्षं
भजत जगत्त्रयनाथचित्रवेषम् ॥

१२

स एष वेषस्तव विश्वरूपपरिग्रहप्रक्रमसूत्रधारः ।
भक्तानुकम्पापरतन्त्रमूर्ते श्रीकण्ठवैकुण्ठ! वि(रा? जे)जयी(यात्?त)॥

१३

विरचितामिति वीरकृष्णलीलाशुक इति विश्रमवीथिमागतेन ।
कविमुनितिलकेन काव्यवाणीपरिणतसीम भवद्विलासदाम ॥

१४

स्तोत्रं तवैतत् तुलसीदलाङ्कं प्रसूनकल्पं हृदये चिराय ।
जगत्प्रभो! शङ्करशार्ङ्गपाणे! भक्त्या प्रणीतं भगवन्! गृहाण ॥

१५

अद्भुतस्तुतिमिमां पुमान् पठन्नुद्भवत्पुलकहारभूषणः ।
उद्भटं कमपि गाहते मुहुर्मङ्गलं हरिहराह्वयं च तम् ॥

इति श्रीकृष्णलीलाशुककविमुनिविरचिता
पञ्चदशश्लोका स्तोत्ररत्नसोदरा
अद्भुतस्तुतिः समाप्ता ॥

॥ श्री ॥

# सरस्वतीनक्षत्रमालास्तवः

श्रीलीलाशुकमुनिविरचितः ।

[स्तवोऽयं गोश्रीराज्यान्तर्गत-कणयन्नूर्-देशस्थ-पटिञ्ञाट्टि-येटत्तुगृहाभिजन रामन् वासुदेवन् नम्पूतिरिस्वामिकात् L-722-चमाङ्काङ्कितात् तालपत्रग्रन्थादुद्धृतः । ]

अयि देवि सरस्वति! त्वदीयाः
स्तुतिधाराः परिलेढुमुद्यतां नः ।
स्वयमेव तव स्तवं दुहानां
रसनां मातरिमां सनाथयेथाः ॥ १ ॥

अरुणाधरबिम्बमम्बुजाक्षं
करुणावर्षि कटाक्षकेलिलक्ष्म् ।
वदनं तव हन्त! भारति! त्व-
त्पथमुल्लङ्घ्य विशृङ्खलं चकास्ति ॥ २ ॥

अकलङ्कशरच्छशाङ्कलक्षा-
प्यसदृक्षा तव वाणि! वक्त्रभङ्ग्याः ।
अधरः पुनरम्ब! पक्वबिम्बी-
पटलीपाटलिमापवादवीरः ॥ ३ ॥

नवपल्लवदर्पविभ्रमान् वा
शरदम्भोजवनच्छविच्छटां वा ।
परिजेतुमलं भवत्पदश्री-
रिति वादोऽप्यसदृक्षदिक्षु गण्यः ॥ ४ ॥

तव देवि! न केवलं मुखेन्दु-
र्विकलङ्केषु विशेषलेखनीयः ।
अपि तु स्फुटमङ्घ्रिपङ्कजाग्रे
विहरन्तः सुकृतो नखेन्दवोऽपि ॥ ५ ॥

अणिमा तव हन्त! मध्यभागे
महिमानं निरुणद्धि निर्विवादम् ।
परिपाटलिमा च पाणिपादा-
धरबिम्बे तनुकान्तिपाण्डिमानम् ॥ ६ ॥

अपि मौलिपदे पदं भवत्याः
शशिना हन्त! जडेन शान्तमेनः ।
अत एव भवत्पदाब्जसेवा-
विरही नित्यनिरूढमौग्ध्यकार्श्यः ॥ ७ ॥

अविशङ्कितदोषगन्धवार्ता
विशदाशेषगुणां विचित्रभूषाम् ।
रसपोषविशेषितां विधाता
नयनैस्त्वां श्रवणैर्वयं भजामः ॥ ८ ॥

जननीं रजनीकरावतंसां
जगतां जङ्गमपारिजातवल्लीम् ।
करुणापरिणाहिनेत्रयात्रां
कतिचित् त्वां हृदये वहन्ति धन्याः ॥ ९ ॥

परिमण्डलकान्तिभारनम्रां
त्रिजगन्मङ्गलदीर्घदीपले(शाखा)म् ।
सुकृतां रसनाञ्चले ज्वलन्तीं
भवतीं चेतसि भावयन्ति धन्याः ॥ १० ॥

भवतीमवतीर्य चित्तवीथ्यां
विहरन्तीं विविधैर्विभूतिभारैः ।
भुवनाद्भुतविभ्रमाभिरामां
पुलकैः कैरपि पूजयन्ति धन्याः ॥ ११ ॥

पतता हृदि हर्षबाष्पमूर्त्या
पयसा त्वामभिषिच्य कोऽपि हृद्याम् ।
पुळकाङ्कुरभूषितां विधत्ते
स्फुटमात्मीयतनूमिवार्द्रचेताः ॥ १२ ॥

मधुरस्मितधौतविश्वविद्या-
विभवोद्गारिमुखेन्दुसम्पदं त्वाम् ।
परिभावयतां परं मुनीनां
निखिलाचार्यपदानि निर्वहन्ते ॥ १३ ॥

कमलेति भुजान्तरे मुरारे-
र्गिरिकन्येति शिवस्य वामपार्श्वे ।
परि(लयि?राजसि) भारतीति धातु-
र्वदनाम्भोजचतुष्पथे त्वमेका ॥ १४ ॥

चतुरेषु चतुर्षु वक्त्रचन्द्रे-
ष्वधिवासं भवती विधेर्विधत्ताम् ।
वदने पुनरम्ब मादृशानां
किमिदं नृत्यसि नन्वियं कृपा ते ॥ १५ ॥

भवतीं भवतीव्रवेदनार्ताः
परमानन्दपयोधिवीचिमालाम् ।
वचसामधिदेवते! वयं ते
मनसा मङ्क्षु विगाह्य धन्यधन्याः ॥ १६ ॥

जगतामधिपत्नि! निःसपत्नं
त्वयि चित्तं मम मग्नमस्तु मातः ।
पदयोर्द्वयमद्वयं पदं वा
तव जानन्नपि नाम धन्यधन्याः ॥ १७ ॥

निखिलागमनिर्विवादगीतं
सहजानन्दतरङ्गदन्तुरं ते ।
मनसः कुहरे वयं पदं ते
गगनोल्लङ्घि कथं कथं वहामः ॥ १८ ॥

स्वरसप्रतिभासुरं पदं यत्
सुखसाम्राज्यमनर्गलप्रसारम् ।
अखिलाद्भुतमुज्झितोपमानं
तदहो! नन्वसि धीरधीविलेह्यम् ॥ १९ ॥

अतिलङ्घितकालभेदवादं
गलिताशेषदिशाविभागगन्धम् ।
निरवग्रहनिश्चयप्रकाश-
स्फुटमाधुर्यमसि त्वमम्ब! तत्त्वम् ॥ २० ॥

सकलव्यवहारदूरदूरं
सरसं किञ्चिदकिञ्चनोपभोग्यम् ।
हृदयं मदयन्मदीयमुच्चै-
र्हृषितं हृद्यमिदं पदं ननु त्वम् ॥ २१ ॥

निजयैव कयापि हन्त ! कान्त्या
दलितध्वान्तपरम्परोपरागम् ।
मधुरिम्णि परं महिम्नि चोच्चै-
र्विशदं धाम विशृङ्खलं खलु त्वम् ॥ २२ ॥

अपवर्गपदास्पदं पदं य-
द्यपवर्गः पशुपाशबन्धनानाम् ।
अपतत् तव रूपमद्वितीय-
क्षममालक्षयतां सतां किल त्वम् ॥ २३ ॥

सहजा तव कापि रूपसम्पद्
वचसां वर्त्मनि नैव नैव नैव ।
अपरा पुनरात्तचित्रवेषा
भुवनं पुष्यति भूमिकाविभूतिः ॥ २४ ॥

अथवा कथयेम तं भवत्या
महिमानं महतोऽपि भो ! महत्याः ।
अपि वाङ्मनसाध्वनि ध्वनन्तीं
कथयेत् कः खलु चिन्तयेच्च तां त्वाम् ॥ २५ ॥

न तदस्ति विनापि यत् त्वया स्या-
च्चिदचिद्भ्यां प्रविभागभाञ्जि विश्वे ।
तदहो महिमाद्भुतं तवेदं
परमस्मात् पुनरम्ब ! यासि सासीः ॥ २६ ॥

तदलं पदलङ्घिनि त्वदीये
मुखरीभूय मुहुर्विभूतिपूरे ।
अपि वा विनयोक्तिभिः कृतं ते
शिशुसंलापवशो हि मातृवर्गः ॥ २७ ॥

जय देवि! गुणत्रयैकवेषे !
जय हे देवि! गुणत्रयैकभूषे! ।
जय देवि! तमःप्रवेशदूरे!
जय हे देवि! निजप्रकाशधारे! ॥ २८ ॥

इति ते स्तुतिमौक्तिकाद्भुतश्रीः
स्वयमग्रन्थत हन्त! सन्निधानात् ।
तदियं तव देवि! कण्ठभूषा-
पदवीं प्राप्य कृतार्थतां प्रयातु ॥ २९ ॥

श्रीकृष्णलीलाशुकवाक्सुभिक्षं
नक्षत्रमालेयमभूतपूर्वा ।
कृष्णस्य देवस्य गिरश्च देव्याः
कलाश्चले वर्षतु हर्षधाराः ॥ ३० ॥

इति कृष्णकेलिशुकवाङ्मयीमिमां
मतिमान् जनः परिचिनोतु जिह्वया ।
उरुचेतसा श्रवणमण्डलेन वा
त्रितयेन वा त्रिभुवनाद्भुतां सुधाम् ॥ ३१ ॥

इति द्वात्रिंशच्छ्लोकसंख्या(?)सरस्वतीनक्षत्रमाला
समाप्ता ।

॥ श्री ॥

# ॥ नृसिंहनवरत्नस्तवः ॥

श्रीकृष्णलीलाशुकमुनिविरचितः ।

[ 'चेङ्ङन्नूर्'देशगत'बुधनूर्'ग्रामस्थाद् 'अटिमिट्टत्तु'नामकाद् भट्टतिरिभवनात् सम्पादिते एतद्ग्रन्थशालायाः १८२२९ तमे तालपत्रात्मकग्रन्थे Z५. Z९. इत्यङ्काङ्कितौ स्तोत्रस्यास्य द्वावादर्शौ यथाक्रमं क. ख. संज्ञितौ । नृसिंहनवरत्ननामकोऽयं स्तवः श्रीकृष्णलीलाशुकमुनिविरचित इति एतदुपान्तिमाद् 'अमुना मनुने'त्यादिपद्यादवगम्यते । ]

उग्रं वीरमुदुन्मदिष्णुषु महाविष्णुं ज्वलन्तं ज्वल
द्दर्वं गर्विषु सर्वतोमुखमसुध्वंस नृसिंहं द्रुहः
अग्र्यं भीषणमद्भुताद्भुततमं भद्रं भवं[1]ध्वंसिन
[2]मृत्युं मृत्युषु मृत्युमृत्युममृतं सोऽहं नमाम्यन्वहम् ॥ १ ॥

कौमोदक्यां कुमार्यां किमिह बहुमतिर्नन्दकः कन्दखान-
श्चक्रं धिक्कारभूमिर्जगति सुविदिता शृङ्गवच्छार्ङ्गशक्तिः ।
शूलं तूलास्थि पाशः पशुषु विषहतां सैव वज्रेऽप्यवज्रे-
त्युद्रिक्तं दैत्यमुच्चैर्दहति नखमुखे त्वां निद[3]ध्यान्नृसिंहः ॥ २ ॥

---

१- ध्वंसनं', २. 'तत्त्वं मृ', ३. 'निधत्तान्नृ' ख.

माणिक्यस्तम्भगर्भे मुहुमुहुमुहिति [1]प्राङ्क्षणे प्रेक्ष्यमाणः
पश्चा(त्यदि)तत्पुरस्ताद् भुगुभुगु भुगिति स्फूर्जितौर्जित्यबाहिः।
प्रारब्धक्रोधभारं [2]भुरभुरभुरिति भ्रान्तकान्तिः परस्तात्
पश्चान्निश्चूर्णितारिस्फुडुफुडुफुडिति त्वां निदध्यान्नृसिंहः ॥ ३ ॥

निर्भिण्णस्तम्भगर्भान्नभसि परिपतन्नुत्पतन् निष्पतन् द्राग्
दैत्येन्द्रोद्रिक्तवक्षस्तटखननन(ः)प्रौ[3]ढगाढाट्टहासैः ।
तद्रक्तोद्रिक्तधाराघुरुघुरुघुरिति ध्याननिर्धूतधैर्यं
निर्घुष्टोद्धट्टनोद्यद्द्रुतनटनसटस्त्वां निपिष्टान्नृसिंहः ॥ ४ ॥

उग्रः खड्गाग्रकोटीखरनखरमुखक्षुण्ण[4]दैत्येन्द्रवक्षः-
पीठप्रौढप्रलोठत्पृथुलफणिफणाभीषणस्फीतपाणिः ।
वीरक्रूरप्रभावप्रतिहसितजरत्कल्पकल्पान्तरुद्र-
क्रीडाव्रीळार्हकेलीभ्रमितभुवनदृक् त्वां निकृन्तान्नृसिंहः ॥ ५ ॥

उद्भ्राम्यद्भद्रकाळीनिनदमुरुमहाभैरवारावगर्भं
विभ्राम्यद्वीरभद्रद्रुतगतिबहलोद्रिक्तनृ[5]त्तान्तरुद्रम् ।
प्रभ्राम्यत्पाञ्चजन्यप्रतिरवभरितप्रौढिमुद्राद्रिकुञ्जं
विभ्राम्यद्वीरसिंहध्वनिधुतगगनं त्वां निरुन्ध्यान्नृसिंह*ः ॥ ६ ॥

---

१. 'प्राङ्कणे' क. २. 'भुरुभुरुभुरिति,' ३. 'ढिगा' ख. ४. 'सम्' क.
५. 'त्ताद्रिरु' ख.

---

* अतः परं खपाठे पद्यमिदमधिकतया दृश्यते—

घोरव्याघूर्णवीरभ्रमिततरतरत्तारकादीप्तदृष्टि-
र्दंष्ट्रान्निर्दष्टसृक्वस्थपुटमुखपुटाटोपोत्थिभ्रान्तजिह्वः ।
नीरन्ध्रध्वानधाराभरभरितहरिद्रन्ध्ररुद्धाट्टहासः
संहृष्टभ्रूसटोग्रभ्रुकुटिभृशपटुर्भर्जतु त्वां नृसिंहः ॥

पुष्टोद्घुष्टाट्टहासस्फुटपटिमभरप्रस्फुरद्ब्रह्मबिम्बं[1]
क्षुभ्यद्ब्रह्माण्ड(ख?भा)ण्डक्षुभितघुमुघुमूद्घूर्णनानार्णवौघम् ।
विभ्यद्विभ्रश्यदभ्रभ्रमणघणघणक्रुष्टनक्षत्रलक्ष-
प्रक्षोदक्षोदशोभोद्भटभुवनमभिद्रुह्यतु त्वां नृसिंहः ॥ ७ ॥

क्षुभ्नीयात् त्वां नृसिंहो घहघहघहिति क्रोधघुष्टाट्टहासै-
रुत्कृन्तात् त्वां नृसिंहः कटकटकटिति क्रुष्टदंष्ट्रोग्रदन्तैः ।
उद्धूयात् त्वां नृसिंहो घटघटघटिति प्रोद्धतोद्यत्सटाभि-
र्निर्दह्यात् त्वां नृसिंहो घुरुघुरुघुरिति[2] प्रस्फुरद्विस्फुलिङ्गैः ॥ ८ ॥

स्तम्भं दैत्येन्द्रवक्षः[3]स्थलमपि युगपत् पाटयन् पाटलाभै-
रम्भोभिः सान्द्रसिक्तद्रवविभवमयैस्तर्पयंस्ततिपतॄंश्च ।
जम्भारातीभकुम्भस्थलदलनभयत्रस्तगीर्वाणसेना-
गम्भीरस्तोत्रधारापरिमलहृपितो भजतु त्वां नृसिंहः ॥ ९ ॥

अहङ्कारग्रन्थे(न्धे?)रिति दलनमन्त्राणि पठतां
त्रिसन्ध्यं संध्यायेत् त्रिजगदधिदेवं नरहरिम् ।
अभङ्गानातङ्कानपि सपदि जित्वा निजारिपू-
नवन्ध्यैरैश्वर्यैरभिमतजयश्रीर्विजयते ॥ १० ॥

अमुना मनुनाशु कृष्णलीलाशुकयोगीन्द्रमुनीन्द्रगुम्भितेन ।
वहतां[4] पठतां जयं जयश्रीर्नरसिंहं नवरत्नमण्डलेन ॥ ११ ॥

---

१. पुष्टोत्पुष्ट' क. २. 'घुरुघुरुघुरिति,' ३. 'वक्षस्तट,' ४. 'भजतां वहतां' ख.

*वीरश्रोत्ररसायनैस्त्रिभुवनप्रौढैरमीभिः स्तवै-
र्वीरश्रीनरसिंहपादकमलद्वन्द्वं मुहुः प्रीयताम् ।
आरब्धाभिनवप्रमोदलहरीभारस्फुरन्निस्सर-
न्नीरन्ध्रस्थितरोमहर्षभरितं नृत्यन्तु वागीश्वराः ॥ १२ ॥

---

* खपाठे पद्यमिदं न दृश्यते-

॥ श्री ॥

# बालगोपालाष्टकम्

लीलाशुकमुनिविरचितम् ।

देव! त्वदाम्रेडनलम्पटेन दिव्येन निर्व्याजमधुद्रवेण ।
उदीरये किञ्चिदुदञ्चिताभ्यां कर्णाञ्चलाभ्यामवधारयस्व ॥ १ ॥

स्तोकोत्तानं चरणकमलं दक्षिणं वामजङ्घा
मूलोपान्ते मृदुनि दधती मञ्जु मध्यं वहन्ती ।
वल्गद्बालाङ्गुलिदरवलद्वक्त्रनेत्राभिरा(मंभा)
वंशीमग्ना वहतु हृदि वो बालगोपालमूर्तिः ॥ २ ॥

अक्ष्णामक्ष्णाममृतललितं हर्षवर्षं दुहाना
बाला नीलाञ्जनपरिणतिर्मञ्जुलस्मेरवक्त्रा ।
अङ्गेष्वङ्गेष्वविरलमहत्कान्तिभारं वहन्ती
चेतस्या(भि।वि)र्भवतु भवतां बालगोपालमूर्तिः ॥ ३ ॥

बर्होत्तंसा विपुलनयना मुग्धवक्त्रेन्दुबिम्बा
कम्बुग्रीवा करुणहृदया कोमलाजानुबाहुः ।
मञ्जन्नाभिर्मृदुलजघना बालपादारविन्दा
मन्दं मन्दं वहतु हृदि वो बालगोपालमूर्तिः ॥ ४ ॥

भूयो भूयो विसृतभुवनाह्लादलीलाकटाक्षा
भूषाभोगव्यतिकरलुठत्पुष्टकान्तिप्रवाहा ।
श्रीमद्बर्हाभरणसुभगश्लक्ष्णधम्मिल्लभारा
चित्ते नित्यं चरतु भवतां बालगोपालमूर्तिः ॥ ५ ॥

माधुर्याणामवधिरवधिर्मञ्जुकैशोरभाजां
मङ्गल्यानां प्रथमभवनं मङ्गलं मङ्गलानाम् ।
वंशीवाद्व्यसनरसिका विश्वविश्वाननश्री-
वीचीभारा तरुणयतु वो बालगोपालमूर्तिः ॥ ६ ॥

भा(वे?ले)लीलारचिततिलका भङ्गुरभ्रूपताके
भद्रां मुद्रां किमपि सुभगं बिभ्रती विभ्रमाणाम् ।
श्रीमद्वंशीवदनवलितैः शीतशीतैरपाङ्ग-
श्चित्ताभोगं शिशिरयतु वोबालगोपालमूर्तिः ॥ ७ ॥

श्यामश्यामा शिशिरशिशिरापाङ्गमङ्गल्यलीला
स्वादुस्वादुः सरससरसस्निग्धमुग्धाननेन्दुः ।
स्मेरस्मेरा मधुरमधुरोदारबिम्बाधरोष्ठी
मध्येचित्तं वहतु भवतां बालगोपालमूर्तिः ॥ ८ ।

धारा भासां तत इत इति प्रस्फुरन्ती समन्तात्
सान्द्रानन्दस्तिमितलहरीभङ्गितुङ्गानुभावा ।
सेवानम्रत्रिदशपरिषद्दत्तचित्तावधाना
चेतःपीठीमाधिवसतु वो बालगोपालमूर्तिः ॥ ९ ॥

जगदखिलमनोज्ञे बालगोपालबाले
किमपि कुतुकभाजा कृष्णलीलाशुकेन ।
विरचितमिति वाचां वीचिमाधुर्यधारा-
परिमलपरिपाकं भावका भावयन्ताम् ॥ १० ॥

॥ श्री ॥

# *अनुभवाष्टकम् ।

निरवग्रहबोधविग्रहं निजमाधुर्यसुधाधुरन्ध(रां?रम्) ।
परितः प्र(थि?थ)तेतरामहो परमं नः परमार्थवैभवम् ॥ १ ॥

अवधूततमिस्रविस्रसं विविधोपाधिपरागदूरगम् ।
हहह ! स्फुटमद्य (तुङ्ग?भुञ्ज्म)हे निजसाम्राज्यसुखैकसम्प्लवम् ॥ २ ॥

स्वरसस्फुरणस्फुटाद्भुतः सहजः सम्प्रसरन् समन्ततः ।
किमपि स्वदतेतरामहो ! महिमा वाङ्मनसातिलङ्घि नः ॥ ३ ॥

सहजन्म समग्रजन्मिनां प्रथमानप्रथमं महन्महः ।
मधुरं मधुरादहो ! मुहुर्मुहुरास्वाद्य चमत्कृता वयम् ॥ ४ ॥

न वचांसि न चित्तवृत्तयः पदमेतत् परिमातुमीशते ।
परमं किमतीदमद्भुतं पुनरप्यद्भुतमद्भुताद्भुतम् ॥ ५ ॥

---

* The Anubhavāṣṭaka is a fine devotional poem consisting of eight verses in the metre Viyoginī. The melody of diction and the extreme sincerity displayed in the poem remind us of some devotional songs of Śrī Kṛṣṇa Līlāśuka. The word "Līlāśukatām" occuring in the last verse might therefore be indicative of the author.

The edition is based on a manuscript (No.18229 S) available in this Library.

चरणाभरणे फणिभ्रमादिव दूराय पलायिता वयम् ।
अ(सुधिु)ना पुनराद्यविद्यया परमानन्दपदे कथं स्थिताः ॥ ६ ॥

गुरुणा करुणानिरीक्षणाक्षणनिर्वासितसर्वसञ्ज्वराः ।
निजानिर्वृतिपर्व सर्वतः कलयामः कथयामहे कियत् ॥ ७ ॥

न परं प्रणयेन केनचित् तव लीलाशुकतां गता वयम् ॥
सपदि स्वपदेऽभिषेचितास्तदहो ! कृष्णकृपाविजृम्भिताः ॥ ८ ॥

अनुभवाष्टकमेतदनारतं
परिपठन्ति जहन्ति रसान्तरम् ।
निजरसेन चिरं चरितार्थता-
मनुभवन्ति जगन्ति निरन्तरम् ॥ ९ ॥

---

॥ श्रीः ॥

# अनन्तशक्तिस्तवः ।

[ अनन्तशक्तिस्तवनामकमिदं त्रिपुरसुन्दरीस्तोत्रं C. O. १२७८ तमाङ्काङ्किताद् ग्रन्थादुद्धृतम् । कुळयोगानुसारं विविधमूलमन्त्र-सम्पुटितैः परश्शतैरनवद्यैः पद्यैः सङ्गुम्फितमिदं साधकानामनन्तशक्ति-प्रदम् । देव्यां त्रिपुराम्बिकायामकृतकभक्तिमता विततबोधेन गुरू-पदेशद्वारा कौळसम्प्रदायरहस्यवेदिना केनापि साधकवरेण विरचितमिदं स्तवरत्नमित्येतस्यान्तिमश्लोकाभ्यामवगम्यते ॥ ]

प्रशान्तपदतः स्वतः स्फुरति येयमाद्यप्रभा
समस्तगुणगर्भिणी विविधमन्त्रवर्णाम्बिका ।
निरुत्तरचमत्कृतिप्रसरसारसम्बोधिका
जयत्यगमजा त्रिधा त्रिपुरसुन्दरी साव्यया ॥ १ ॥

इच्छाज्ञानक्रियाख्यं त्रितयमिह परं वाग्भवादिक्रमैर्वै-
र्या देवी निर्विभागा परमशिवपदा स्फारयन्ती नितान्तम् ।
स्वातन्त्र्योल्लासवृत्तिर्निरवधिविभवा निर्मला निर्णये(तादृ)-
वर्णावर्णप्रकारस्फुरिततनुलता सा जयत्याद्यशक्तिः ॥ २ ॥

वर्गैरष्टभिराकृतिस्तनगतिः शीर्षासहृत्पृष्ठगै-
र्गुह्याङ्घ्रिक्रमनिष्ठितस्तव सदा ज्ञानप्रतानप्रदा ।
चिद्रूपा परमा विभाति नितरां देव्यक्षगाक्षाश्रया
पीठाद्यानिलया त्रिमूर्तिवसतिः कौलापहा कौलिनी ॥ ३ ॥

निरुत्तरेच्छोभयसामरस्या-
या मूर्तिराद्या प्रविभाति दीप्ता ।
आनन्ददाहार्धकलार्धगर्भा
तां नौमि शृङ्गाटवरासनस्थाम् ॥ ४ ॥

हुतवहरविसोमब्रह्मचक्रान्तराले
स्फुरति निरवकाशा शम्भुशक्तिः स्वतन्त्रा ।
सकलभुवनवर्गं पूरयन्ती स्वभाभिः
परमशिवधराद्या भित्तिमूर्तिं नु(न?म)स्ताम् ॥ ५ ॥

ब्रह्मव्योम्नो विकसितगतिः शक्तिराद्या स्फुरन्ती
मायागर्भे समरसतया व्यक्तरूपं विधाय ।
त्यक्त्वा भूमिं भरितभुवना जन्मसंज्ञां सुसूक्ष्म-
प्राणोद्घातैः शिखिशितमुखा मोहिनी ग्रन्थिसक्ताम् ॥ ६ ॥

प्रोल्लङ्घ्याशु प्रततहृदयव्योमधामाव्ययाख्या
स्वं प्राप्य क्षपितकलना या महानादवृत्तिः ।
नित्या देवी निरवधिलसद्वाग्विलासप्रपञ्च-
स्फूर्त्युद्दामग्रथितरचनाहेतुभूतां नुमस्ताम् ॥ ७ ॥

भूयस्ततोऽपि हृदयार्धकलाकृतिर्या
शक्तिः परा निरवधिं करवा विरौति ।
प्राणप्रवृत्तिशमतः परभूमिमाप्ता
वक्रातिगा विततदुर्यन(म?भ)ःस्वरूपा ॥ ८ ॥

तां नौम्यनन्तविभवां भुवनालिसर्ग-
मत्ताङ्गनाहृदयमोहनदक्षलक्ष्माम् ।
देवीं परां त्रिपुरसुन्दरिनामधेयां
सर्वाभिलाषपरिपूरणकल्पवल्लीम् ॥९॥

बिन्दुं विगाह्य परमामृतसारवर्षा
वेगाद् विमुच्य परितः कपिलावनिस्थाम् ।
हार्धाकृतिप्रबलवह्निसहस्रदीप्ता
मायाविमोहविलयाच्छिवधामसंस्था ॥१०॥

शक्तिः परा जयति सा परमा विभेद-
वृत्त्या जगत्सुखचरं वचसामगम्यम् ।
आसाद्य सत्सु वितनोति विमुक्तिलक्ष्मीं
यस्याः स्मृते च लयमेति विषं त्रिधोत्थम् ॥११॥

इत्थं देव्या निरवधि महः सर्वदिक्कं विभाति
त्रेधा भान्तं सततविततं धामचारक्रमेण ।
ऋद्धिं सिद्धिं निरुपमहामोक्षकक्ष्यामपीह
प्रस्फार्याशु स्वकुलपदगं यस्य सम्यक् स मुक्तः ॥१२॥

शाक्तेन बीजेन विकास्य शक्ति-
मिच्छात्मिका या विषमत्ति सर्वम् ।
उन्मीलयन्ती भुवनान्यभेद-
रूपाणि गर्भे तु नमाम्यहं ताम् ॥१३॥

नैरञ्जनं धाम परं नितान्तं
विकासयन्ती सदसद्विहीनम् ।
चक्राश्रयादिक्रमविक्रमौघ-
संहारिणीं नौमि चितिं स्वतन्त्राम् ॥१४॥

कामाख्यबीजेन चितिं क्रियाख्यां
प्रोल्लास्य विश्वं वमनात् समग्राम् ।
करोति नित्यं निजबीजवृत्ति-
माहात्म्यतो या प्रणमाम्यहं ताम् ॥१५॥

आद्येन बीजेन स(दे?दै)व देवी
ज्ञानाभिधां शक्तिमिहामिताभाम् ।
विष्फार्य गङ्गाजलवीचि(वि?व)द्या
तनोति काव्यं रुचिरं नुमस्ताम् ॥१६॥

ब्राह्मे बिले हृद्भुवि नाभिवाह्नि
यद्वर्णभङ्गिर्नितरां विभाति ।
तां नौमि देवीं परनादशक्ति
प्रोल्लासरूपां त्रिपुरां त्रिमार्गाम् ॥१७॥

स्फटिकमणिनिभं यच्छक्तिबीजं करन्ध्रे
प्रभवति परसंविद्यामिनीनाथरूपम् ।
अमृतनिकरधारासारमुच्चैर्विमुच्य
प्रततकुलकलापव्यापकं तत् प्रपद्ये ॥१८॥

अभिनवदिननाथप्रस्फुरत्कान्तिवर्णं
हृदयगगनधाम्नि भ्राजते यत् सदैव ।
तदिह कुसुमचापस्फारकं कामराजं
भवति निखिलकान्तासन्ततेर्ध्याननयोगात् ॥१९॥

कुसुमविशिखवर्णैः पञ्चभिः साध्यनाम
स्फुरदनुपमनादस्फारमाविश्य सम्यक् ।
धृतमिह नितरां यत् कामराजोदरस्थं
कतिपयदिनपूजाध्यानतः क्षुभ्यते तत् ॥२०॥

कुलगगनपदान्तर्दिव्यलिङ्गाग्रभागे
प्रभवति परबीजं वाग्भवं विद्युदाभम् ।
यदिह विविधविद्याद्योतकं ध्यानगम्यं
जयति निरुपरागं तत् परं विश्वरूपम् ॥२१॥

(वाग्)भावाद्यैः स्फुरदमितभाभास्वरैः षट्प्रकारै-
र्दिव्यं मान्त्रं वपुरनुपमं तावकं ये विदन्ति ।
तेषां देवि! त्वम(पर? पि) परमां सिद्धिमुच्चैर्ददासि
स्थूलं सूक्ष्मं परमथ महाध्यानमाश्रित्य मातः ॥२२॥

इति जननि तवेदं दिव्यमन्त्राक्षराणां
निगदितमनुपाधि ध्यानमध्यात्मदृष्ट्या ।
गुरुवरपरचक्रस्फारसत्सम्प्रदायात्
प्रभवति निजचित्ते यस्य सम्यक् स सिद्धः ॥२३॥

इत्थं त्वदिच्छोचलिता त्रिधेयं
वर्णोज्झितं वार्णमिदं स्वरूपम् ।
प्रकाशयन्ती पराचिद्विकास-
प्रोल्लासितं या प्रणमाम्यहं ताम् ॥२४॥

ज(यत्र?गत्र)यं गौणमथाविरूपं
धामाभिधं कारणसंज्ञितं च ।
चक्रादिकं तात्त्विकमप्यनन्त-
स्याप्येत्थमाशु प्रथिता स्वतो या ॥२५॥

त्रिधा त्रिधेदं तु विकास्य विश्वं
सर्वातिगानुत्तराचिद् विभाति ।
सदात्मना प्रच्युतवृत्तिरुच्चैः
स्थितेह तां नौमि परां भवानीम् ॥२६॥

विश्वं सर्वं समरसतया व्यक्तमन्तर्विधत्ते
द्विव्योमाङ्काकुलितविभवा याम्बिका सा निरुक्ता ।
सम्प्रत्येषा शिततरमुखा बीजमात्रं स्वतन्त्रा
शक्तिर्वामा प्रथमहकलाकारमात्राङ्कुरत्वम् ॥२७॥

कौण्डिल्येव प्रभवति शिखाकारमाश्रित्य दीप्ता
ज्येष्ठा दण्डाकृतिरिव कला दर्शिता शास्त्रदृष्ट्या ।
रौद्री रौद्रा त्रिजगदखिलं भासयन्ती त्रिकोणा
त्वं देव्येव त्रिदशनमिते भास्यनन्तैक(तै?द्वै)त्र ॥२८॥

आभिः कलाभिरभितो निजरूपमत्र
प्रस्फार्य वर्णरचनामवलम्ब्य देवि! ।
सन्मन्त्रतन्त्रवरविश्वविभागचित्रं
संविन्नयस्यखिलमात्मरुचो विभिन्नम् ॥२९॥

नामरूपकलनाकुलं प्रिये
स्वैरतात्र कुलनायिके कुलम् ।
आश्रितार्थगुणं कुळक्रमं
कौल्यते कमपि चेष्टितं त्विदम् ॥३०॥

प्रकाशधर्मा भगवान् महेशो
यया विना भाति न कुत्रचिच्च ।
यद्वीर्यविज्ञानविकासयोगाद्
विश्वोदयाभासनिरासकृत्यै ॥३१॥

कर्ता विभुर्भेदविभागमुक्तः
सत्तां विगाह्य प्रथते सदैव ।
तां नौमि शक्तिं त्रिपुराभिधानां
महाविमर्शोदयवृत्तिरूपाम् ॥३२॥

एका या पञ्चशक्तिक्रमपरहुतभुग्युग्मयुग्मैनयवृत्तौ
शार्वी सन्मण्डलेऽन्तः प्रभवति सततं योनिभिस्स्युत्तराभिः ।
चत्वारिंशद्भिरुच्चैरकृतकरचनाराजिते दिव्यपद्म-
द्वन्द्वाङ्के द्वारतुर्यं दिशतु जगति शं चक्रदेवीयुता सा ॥३३॥

प्राणो वह्निरिहोच्यते प्रळयकृज्जन्मादिशीर्षान्तगः
प्रोन्मेषः क्षितितुर्यमारुतमहाभूतान्तसत्ताश्रयः ।
शक्तिः शाम्भवधामतस्त्वनवधिः सृष्टिक्रमप्रोदि(ता)
कादिक्षान्तगता सदेति गुरुतो ज्ञात्वामरत्वं व्रजेत् । ३४ ॥

अग्निरूर्ध्वगतिर्नृणां वपुः संहर्तुमुद्गतः ।
शक्तिः सामृतवर्षेण तं विलाप्य ततः सृजेत् ॥ ३५ ॥

तस्मादकुळतः शक्तिं प्रसृतां भावयेद् बुधः ।
तद्भावनातः सततं त्रिजगत् स्यादनश्वरम् ॥ ३६ ॥

अपानधर्मा प्रतिभाति यस्याः
पुरःस्थितं पूरकधामनिष्ठः ।
गणाधिनाथः सकलान् विलाप्य
सङ्कल्पविघ्नान् प्रणमाम्यहं ताम् ॥ ३७ ॥

प्राणप्रवाहप्रचयस्वरूपो
द्वाराग्रवर्ती वटुको विभाति ।
(वां।वा)ह्योन्यवर्गौघनिपानसक्तो
यस्या नतोनं त्रिपुरेश्वरीं ताम् ॥ ३८ ॥

सुधाब्धिमुख्यं प्रविभाति यस्याः
पीठासनं चक्रकलात्मिकायाम् ।
तां विश्वरूपां प्रणमाम्यनल्प-
प्रोन्मेषरूपां त्रिपुरां त्रिमार्गाम् ॥ ३९ ॥

त्र्यश्रमध्यगगनोदरोदिता
सर्वचक्रविभवौघनायिका ।
तुर्यरूपमनवगाह्य भाति या
तां परां त्रिपुरसुन्दरीं नुमः ॥४०॥

ओड्डियाणपरपीठसंश्रयं
संश्रिता निरवकाशधर्मिणी ।
निर्विकल्पपरधामचारिणी
या कलामयमहं नतोऽस्मि ताम् ॥४१॥

सर्वज्ञताद्यानि वराणि भान्ति
यस्याः सदाङ्गानि हृदादिकानि ।
तां नौमि देवीं परिबोधधाम-
रूपःदामरूपामिह वामकेशीम् ॥४२॥

इच्छादिशक्तित्रितयं क्रमेण
कामेश्वरीमुख्यमिह त्रिकं च ।
पीठत्रयाकारमये त्रिकोणे
चकास्ति यस्याः प्रणमाम्यहं ताम् ॥४३॥

रुद्रस्य विष्णोः कमलोद्भवस्य
परस्य च ब्रह्मतनोः शिवस्य ।
एकैव शक्तिः प्रतिभाति नित्यं
निजेच्छया जन्मपदे च शुद्धाम् ॥४४॥

शब्दादितन्मात्रवपुर्महोग्रं
यस्याः पुरोवर्ति महः समिद्धम् ।
अस्त्राष्टकं चैव परान्तराळे
विराजते तां प्रणमामि देवीम् ॥४५॥

चक्रं वशिन्यादि पुरं महेश्या
वर्गाष्टकाकारमतुल्यरूपम् ।
चकास्ति यस्याः परितोऽष्टकोणे
चक्रेश्वरीं तामिह नौमि नित्याम् ॥४६॥

ततो दशारं हुतभुक्कलात्म-
सर्वज्ञदेवीप्रमुखं तु चक्रम् ।
अव्यक्तरूपं प्रविभाति यस्या-
स्तां सूक्ष्मनादां प्रणमामि नित्याम् ॥४७॥

द्विपञ्चकोणेऽथ विभाति दीप्तं
चक्रं द्वितीये दहनांशुरूपम् ।
सिद्धिप्रदादिप्रमुखं तु यस्या
व्यक्तं पुरस्तात् त्रिपुरां भजे ताम् ॥४८॥

चतुर्दशारे कृतसुप्रतिष्ठं
संक्षोभिणीमुख्यमिहार्कचक्रम् ।
अन्तर्बहीरूपकलाद्वयेन
युक्तं तु यस्याः सततं नुमस्ताम् ॥४९॥

पद्मेऽष्टपत्रे स्थितमष्टकोत्थं
चक्रं तु पुर्यष्टकभेदभिन्नम् ।
उर्व्याद्यहङ्कारमयस्त्वनङ्ग-
पुष्पादिकं यत्पुरगं नुमस्ताम् ॥५०॥

द्विरष्टपत्रे जलजेऽन्तराळे
शीतांशुरश्मिप्रविभक्तगात्रम् ।
कामाभिधामुख्यमिहोदितं तु
यस्याश्चितेस्तामिह नौमि नित्याम् ॥५१॥

बाह्यनिष्ठचतुरश्रसंस्थिता
मातरोऽष्टककलात्मिका इमाः ।
व्यक्तवर्गतनवो यदङ्गना-
स्तां नमामि पररावचारिणी ॥५२॥

त्र्यश्रादिचक्रनिवहे प्रथितां सदैवं
चक्रेश्वरीचयमये स्वयमेव देवी ॥
निर्धामधामविभवा परमेशधाम्नि
येयं विराजितवपुः स्वचितिं नुमस्ताम् ॥५३॥

मुद्राभिरुच्चैर्दशभिः स्वधाम-
रूपाभिराशु प्रविभात्यमेया ।
त्रिखण्डमुद्रादिमयीभिराद्या
येयं चितिस्तां प्रणमामि नित्याम् ॥५४॥

मोदयन्ति स्वचित्स्फारैर्द्रावयन्ति मलानि याः ।
मुदं रान्ति च मुद्राख्याः ख्यातास्ता इह शक्तयः ॥५५ ।

एकैव या पूजनवैभवेन नानाविचित्रेण बहुप्रकारम् ।
विष्फार्य रूपं निजमप्रमेयं विराजते तां प्रणतोऽस्मि देवीम् ॥५६॥

प्रोद्दामपूजाक्रमभेदभङ्ग्या
या प्रोद्गता व्युत्क्रमतः समन्तात् ।
निजस्वरूपप्रतिपादनाय
तां नौमि देवीं गुरुमूर्तिमात्ताम् ॥५७॥

चिद्विमर्शवपुषो निरन्तरा
रश्मयस्त्रिपुरसुन्दरीह ये ।
भान्ति ते परशिवाम्बरप्रभा-
मण्डलं तदिह धाम वाचकम् ॥५८॥

रेखाक्रमो भाति विचित्रवृत्ति-
र्योऽयं स्वशक्तिप्रसरप्रभेदः ।
एकस्य चिद्व्योमतनोरनेक-
स्तथैव सा सद्धृदि पोस्फुरीति ॥५९॥

बालभानुसदृशेन मूर्तिम-
द्वैभवेन निजमान्तरं महः ।
दर्शयत्यमितबोधबृंहितं
सर्वदिक्कामिह या नतोऽस्मि ताम् ॥६०॥

एकेन या वक्त्रवरेण देवी
सर्वोदयं सर्वविकल्पमुक्तम् ।
सत्सूचयन्ती परभक्तिभाजां
त्वां शक्तिमानन्दतनुं नमामि ॥६१॥

नेत्रत्रयेणेह सदा भवानी
या जागरादित्रभवात्मकेन ।
ज्ञेयादिरूपं त्रिजगत्प्रपञ्चं
संलक्षयन्ती प्रणमाम्यहं ताम् ॥६२॥

दोर्दण्डयुग्मद्वयसन्निवेश-
क्रमेण या वर्गचतुष्कमुच्चैः ।
आवेशयन्त्याशु विचित्रमूर्ती-
स्तां नौमि नित्यां परमामवाच्याम् ॥६३॥

दृगादिवृत्तिप्रचयस्वरूपं
शरौघमुच्चैरिह पञ्चधा या ।
(विभक्ति? भिनत्ति) देवी नितरामनादि-
बोधैकमूर्तिः प्रणमाम्यहं ताम् ॥६४॥

चैतन्यविष्फारवपुर्बिभर्ति
या कार्मुकं बुद्धिगुणेन युक्तम् ।
तां नौमि देवीं परचित्प्रकाश-
रूपेश्वराभिन्नविमर्शशक्तिम् ॥६५॥

आकृष्य पाशेन समस्तदोषान्
मोहादिकान् कौण्डलिविग्रहेण ।
भिनत्ति यास्त्रेण महाङ्कुशाख्य-
रूपेण संहारकलामयेन ॥६६॥

तां नौमि देवीं कुळशून्यधाम-
मध्योदितां कारणपञ्चकं च ।
जन्मादिभूम्यन्तरगं समन्ताद्
विलापयन्तीमकुलामवाच्याम् ॥६७॥

या द्वादशान्तःस्थितशैवधाम-
लब्धास्पदा कालकलाविमुक्ता ।
तां नौमि देवीं परशून्यगर्भे
शान्तां प्रशान्तं वपुरुद्वहन्तीम् ॥६८॥

स्वातन्त्र्यतन्त्रेण ततोऽपि * *
विकासवृत्तिं परमां विगाह्य ।
चान्द्रं महामण्डलमप्रमेयं
विद्राव्य तूर्णं कुळमाविशन्तीम् ॥६९॥

पीयूषधाराप्रचयेन नित्य-
मापूर्य जन्मावधि धाम्नि भूयः ।
लब्धप्ररोहप्रभवप्रशान्ति-
रूपेह तां शक्तिमहं नमामि ॥७०॥

आधारमाकुञ्च्य गुरूक्तयुक्त्या
प्राणान् निरुद्ध्योर्ध्ववहं क्रमात्तम् ।
प्रज्वा(लीलय) मध्यास्थितशक्तितेजः-
पुञ्जं समाधिं विभजन्ति धन्याः ॥७१॥

इत्थं समाविश्य कुलक्रमस्थां
मुद्रां महामन्त्रमयीस्वरूपाम् ।
प्रकाशतां याति निराख्यरूपा
येयं परा शक्तिरिह स्तुमस्ताम् ॥७२॥

विगाह्य मेढ्रादिनवप्रकार-
स्थानौघमुख्यैर्नवभिः समेतम् ।
शिखाग्निलक्ष्यैर्ज्वलिता ददाति
सिद्धिं परां या प्रणमाम्यहं ताम् ॥७३॥

अनेन सद्देशिकसम्प्रदाय-
क्रमोदयेनाश्ववगम्यते यैः ।
देवी यदेषां परभुक्तिमुक्ती
ददाति गर्भे तु नमाम्यहं ताम् ॥७४॥

देवीं नुमस्तां परितः स्वसंवि-
द्रूपां वरां भक्तिविकासयोगात् ।
यया महादित्रितयप्रपञ्चः
प्रक्षालितो बोधजलप्रपूरैः ॥७५॥

पुष्पादिबाह्यप्रततोपचारै-
र्देव्यर्च्यते भक्तजनैः सदैव ।
आभ्यन्तरा काप्यमितात्र पूजा
यस्याः स्वरूपानुगुणस्थितायाः ॥७६॥

तामेव वक्ष्ये गुरुवक्त्रयुक्त्या
संक्षेपतः साधुविबोधनाय ।
सूक्ष्मां परां च स्वचितिस्वरूपां
सम्यक् समाविश्य निजप्रबोधम् ॥७७॥

पितामहरमाधिपप्रभृतिपञ्चकं हेलया
विलापयति यन्महः प्रथमनादवृत्त्युद्गमात् ।
तदेव विततप्रथं स्वकुलमध्यगं देवि ते
स्थितं स्वरसतः सतां विततमध्यगं निर्मलम् ॥७८॥

तासां महत् कञ्चुकपञ्चकं यत्
तदेव यस्यार्घ्यमनर्गलस्य ।
समर्च्यते तत् प्रणमामि भक्त्या
देवीस्वरूपं विततप्रकाशम् ॥७९॥

पञ्चप्रवाहोदितशक्तिचक्र-
क्रमोद्धृतैर्भावविभागपुष्पैः ।
याहर्निशं देव्यनुरोधतस्त्वं
समर्च्यते सद्भिरभिष्टुमस्ताम् ॥८०॥

आह्लाद् बिलादूर्ध्वगमोदितालं
शक्तिप्रभा धूपशिखेव भाति ।
यदग्रगां नौमि समस्तभाव-
संहारिणीं तां निजचिद्विभूतिम् ॥८१॥

प्राणप्रवाहौघनिघट्टनेन
यज्ज्योतिराग्नेयमनल्पवीर्यम् ।
उदेत्यसौ दीपवरः प्रदीप्तो
यदग्रगस्तां प्रणमामि देवीम् ॥८२॥

अखण्डितस्वात्ममहावभास-
चित्कुङ्कुमौघः प्रततप्रमोदः ।
सदाङ्गरागः प्रविभाति यस्या-
स्तां नौमि देवीं रमणीयवृत्तिम् ॥८३॥

अक्षवर्गगसंनिष्ठितं परं
चित्तभैरववपुर्निवेदनम् ।
यत्प्रियं निरवधि नमामि तां
सुन्दरीमपरबोधबृंहिताम् ॥८४॥

चिन्मृगाङ्कवपुषश्च्युतामृत-
स्रावसम्भृतमहार्घ्यपात्रतः ।
तर्पणं विततमास्थितं सदा
यत्तनोः सततमस्मि तां नतः ॥८५॥

जन्मकुण्डगगनोदरोद्गतश्चित्रभानुरिह भासितत्कटः ।
अक्षपक्षविषयाहुतीः सदा भक्षयन् निरवधिक्रमाकरैः ॥८६॥

जाज्वलीति करणेशसप्तकप्राज्यघस्मरशिखाविराजितः ।
चित्तविभ्रममयेन्धनैः सदा वह्निकर्म तव देव्यवरिथतम् ॥८७॥

इत्थं सदा सद्भिरनादिबोधधामा निकेतं गुरुवक्त्रगम्यम् ।
सम्यक् समाविश्य समर्च्यते या तां नौमि काञ्चिच्चितिमप्रमेयाम् ॥

इयं परस्मादविभिन्नरूपा शिवस्वतन्त्रा क्रमतोऽक्रमेण ।
आदौ परेणाथ परावराख्यभेदेन पश्चादपरेण देवी ॥८९॥

निजस्वरूपं तु विभज्य नित्यं जहाति नैवाप्रतिमप्रभावम् ।
शैवं महः सर्वविभेदमुक्तं निरन्तरं या प्रणमाम्यहं ताम् ॥९०॥

चिदङ्कुरं कामकलास्वरूपं बिन्दुं विचिन्त्यामृततेजसेद्धम् ।
अनाहतोन्मेषनिनादशक्तिवक्त्रे स्थितं व्योमबिलान्तराळे ॥९१॥

तस्याधरस्थं शशिसूर्यरूपं बिन्दुद्वयं पार्श्वयुगप्रवाहम् ।
तस्याप्यधो वह्निशिखास्वरूपरेखाकृतिं च प्रविलाप्य सम्यक् ॥९२॥

एतं क्रमं ध्यानपरं सदैव त्यक्त्वा क्रमं सर्वविकल्पमुक्तम् ।
ध्यायेन्महासाधकपुङ्गवो यो लभेत् स सिद्धिं परमां शिवोक्ताम् ॥९३॥

मायाकामासनस्थं हृदयपदगतं कामराजस्य साध्यं
ध्यात्वा तद्बाह्यकोष्ठं पुटितमनुपमं वाग्भवं तद्बहिश्च ।
शृङ्गारं कोणषट्के बहिरपि च ततस्त्रिस्थिता तुम्बुरूर्ध्वं
कृत्वा करींबीजकं यत् स्मरति स भुवनं क्षोभयेद् देवि सम्यक् ॥

इदं यन्त्रं समाधिस्थो दृग्गोलो केळियोगतः (?) ।
महाकामकलां ध्यात्वा पूजयेद् यः स सिद्धिभाक् ॥९५॥

विद्याधरी सुरवधूरपि सिद्धपत्नी
गन्धर्वदिव्यललनोरगनायिकापि ।
यक्षेश्वरप्रियतमा नरधुर्यरामा
त्वत्सेवकस्य भवतीह वशा सदैव ॥९६॥

एकैकाक्षरसाधनं विधिवरैस्त्वन्मूर्तिमाद्यां परां
ध्यात्वा ये भवपत्नि! साधकवराः कुर्वन्ति तेषां सदा ।
त्वद्दृक्पातपवित्रितैकमनसामत्यद्भुता जायते
सिद्धिर्यद्वशतः सुराधिपमुखा दास्यं स्पृशन्त्यादरात् ॥९७॥

यो लक्षाणि वराङ्गजन्महृदयब्रह्माख्यरन्ध्रात्मना
ख्यातान्यत्र कुलागमे गुरुवरैर्यान्याद्यसिद्धेश्वरैः ।
तद्ध्यानं परितो विधाय निपुणैर्लक्षत्रयं जप्यते
शक्त्युद्दीपनपूर्वकं तु परमा सिद्धिस्ततो जायते ॥९८॥

वश्याकर्षणवाग्भवादिपूरणास्तम्भादिकार्यक्रम-
श्चक्रध्यानसमर्चनादिविधिना सिद्ध्यत्यवश्यं नृणाम् ।
कारुण्यात् तव देवि! निर्मलधियां मोहाभिधानक्षया-
न्मोक्षप्रत्ययदर्शनाय सततं मुख्यानुभावोऽत्र नः ॥९९॥

चतुर्थशक्तिप्रथितं विलाप्य मोहप्ररोहं भवभेददं या ।
विकास निर्द्वन्द्वचितिप्रकाशप्रकाशितां शक्तिमनुग्रहाख्याम् ॥१००॥

विभाति तां नौमि भवाब्धिमध्ये
प्रोन्मग्नजन्तूद्धरणैकदीक्षाम् ।
निर्धामधामक्रमविस्फुलिङ्ग-
प्रपूरिताशेषदिगन्तरालाम् ॥१०१॥

अकृतकपरभक्तिव्यक्तिसंसक्तचित्त-
प्रथितविततबोधस्फारसम्प्रेरणेन ।
कृतमिदमनिकेतध्यानसाध्यैकमूर्ते-
र्निरुपमनिजसंविद्देवतामाययोच्चैः ॥१०२॥

गुरुवरवदनोत्थप्राज्यसत्सम्प्रदाय-
क्रमपरमरहस्यैर्बृंहितैर्वाग्विलासैः ।
त्रिपुरमथनकान्ताभक्तिसक्तेन यत्तत्
स्तबकममलचित्ता हन्त शृण्वन्तु सन्तः ॥१०३॥

अनन्तशक्तिकृच्चेदं स्तोत्रं तव महेश्वरि! ।
यत् तेन देवि! भक्तानां भुक्तिमुक्तिमहाफलम् ॥१०४॥

अनन्तशक्तिस्तवः
समाप्तः ।

## कामाक्षीस्तवः ।

कण्डूलगण्डविगळन्मदवारिधारा-
गण्डूषपण्डितमधुव्रतमण्डिताय ।
शुण्डालबन्धुरमुखाय तुषारभानु-
खण्डावतंसकलिताय नमः शिवाय ॥ १ ॥

रसाळतलभूषितं रजनिबन्धुना भूषितं
समग्रमनुकम्पया सविधसेवितं कम्पया ।
नमत्सुमनसं पदे नमत सन्ततं सम्पदे
गिरीशमधिकाञ्चि तं गिरिसुताकुचाङ्काञ्चितम् ॥ २ ॥

जयन्ति श्रीमन्तो जडिमहिमसंहारमिहिरा
मनीषामाकन्दप्रसवनववासन्तदिवसाः ।
गिरां नाथे! नानारसभणितियोषाभिसरण-
प्रदोषा निर्दोषास्तव चरणसन्नामविधयः ॥ ३ ॥

क एष प्रस्तावस्तव नवनसन्नाहपदवी-
दवीयो देवीदं धिषणधिषणानैपुणमपि ।
तदास्तामुद्योगः स्तुतिवचसि याचे पुनरिदं
समस्तोऽत्र स्तोत्रीभवतु मम सञ्जल्पनविधिः ॥ ४ ॥

---

This is a Stotra in praise of Kāmākṣi, the goddess installed in the temple of Kanchi. There is only one Ms. of this in our collection, Viz. Ms. No. L. 103.

सदा याचं याचं कथितबहुवाचं जनमिमं
प्रति क्रोधो वेधोरमणि! करणीयो न कलया ।
न योगप्रावीण्यं न च बहुविधस्तोत्रपटिमा
न वा सेवादाक्ष्यं किमिह विदधे याचनमृते ॥ ५ ॥

जतुद्रावं देवि! द्रवतु जवतश्चित्तजडिमा
शरत्पद्मोन्मीलं मम विलसदुन्मीलतु मनः ।
मुखाद्वीची वाचां त्रिदिवविगळन्निर्जरधुनी-
तरङ्गाळीगाळं गळतु मधुनिष्यन्दमधुरा ॥ ६ ॥

जगन्नाथे! जाल्मं निबिडजडिमग्रन्थिजटिलं
जनं दीनं मैनं जननि! मनुथाः स्मान्यशरणम् ।
प्रमीळाप्रम्लानं पदयुगळनाळीकविगळ-
न्मधूळीपाळीभिर्मम सरजसं क्षाळय मनः ॥ ७ ॥

जगन्मातर्जातप्रथिमनि मनीषाजडिमनि
स्तृणाने खिन्दानः किमिव मनवै किं वितनवै ।
प्रसीदासीदात्मन्यखिलदुरितोत्सादिनि! दिने
दिने दीनेऽदीने! मयि वितर कारुण्यकणिकाम् ॥ ८ ॥

करे वामे वामे! कमलमृदुळे पुस्तकधरं
परस्मिन् साक्षस्रक्स्फटिकनिभमत्रासवरदम् ।
भवत्वन्तः साक्षादकृपणकृपाकन्दळमिळत्-
कटाक्षव्यापारं वपुरुपनिषज्जीवितमिदम् ॥ ९ ॥

---

कृपाकोपाटोपस्फुरितपदपद्मास्यदळिताद्
घनस्वान्तध्वान्तप्रकरकरिसन्दोहशिरसः ।
समुन्मुक्ता मुक्तामणय इव शुद्धा भणितयो
भवद्भक्तास्येभ्यो भगवति! विसर्पन्ति परितः ॥ १० ॥

ममान्तर्वाणि! त्वं हर तिमिरमित्यर्थनविधां
विधास्यन् यस्तस्मै पदयुगळमात्रं कथयते ।
असौ शास्त्रज्ञत्वं वरयितुमुपक्रान्त इति तद्
ददानः सद्यस्ते जयति सदयासम्भ्रमरसः ॥ ११ ॥

असौ सेवा दावे रुदितमियमिज्या जललिपि-
र्गजस्नानं ध्यानं तदपि स जपो भस्मनि हुतम् ।
प्रणामो नामष प्रकृतिजळमूकाङ्घ्रिपतनं
यदम्बालम्ब्येत प्रतिदिनमनुद्दिश्य भवतीम् ॥ १२ ॥

सजीवो मा जीवन् भवति बत मा जाग्रदपि मा
विजानन् मा ध्यायन् जनजननि! तस्यास्त्वजननिः ।
न यस्त्वामाशास्ते न विनमति न स्तौति मनुते
न नोपास्ते नाध्येत्यवति न वृणीते न च सकृत् ॥ १३ ॥

गळद्दम्भां शुम्भत्पृथुलकुचकुम्भां हृतशशि-
प्रभाडम्भां सम्भावितलिखितगुम्फाजपपटाम् ।
मनस्तम्भारम्भप्रथुमनि (?) भजे त्वां कृतकृपा-
परीरम्भामम्भोरुहसदनसम्भोगकलिकाम् ॥ १४ ॥

भवत्या नित्योत्तंसितसितसुधाप्लुतिविगळत्-
सुधासारस्रोतोविसर इव हृत्पङ्कजजुषः ।
नृणां त्वद्ध्यातॄणां नववदननालीककुहर-
प्रणाळीनाळेन क्षरति कवितासौरभभरः ॥ १५ ॥

गतिखिन्नां वन्यस्तबकनिवहन्यासविलसत्-
कचां केचित् काचावलिखचितनीचेतरकुचाम् ।
हृदि त्वामीक्षन्ते कपटमृगयोः पत्रपटली-
दुकूलां कालारेरनुपदचरीं काननचरीम् ॥ १६ ॥

धरे! दुर्गां स्वर्गाधिपविमतवर्गापहरणीं
महारंहस्सिंहप्रवरपरिविन्यस्तचरणाम् ।
करे वल्गत्खड्गप्रविहितजगत्राणविभवां
भवार्तिव्यावृत्त्यै भगवति! भजन्ते हि भवतीम् ॥ १७ ॥

इदं स्यादेतत् स्यान्मम पुनरदः स्यादिति सदा
श्रुतं वा दृष्टं वा सकलमुपयाचे न भवतीम् ।
सकृन्मह्यं मुह्यन्मलिनमनसे मातरमलां
त्वदीये दीयेत द्युतिमति पदे भारति! रतिम् ॥ १८ ॥

अथो या वा सा वा भव भवरमेशाम्बुजभुवा-
मपीड्ये! पीड्येऽहं जनजननि! जाड्येन न यथा ।
तथा भूयाद् भूयानिह तव विभूतिस्तवविधिः
कथंकारं कर्तुं कविभिरपि शक्येत सकलः ॥ १९ ॥

## * मुक्तिपुरस्थदेवीस्तोत्रम् ।

निखिलनिगमवेद्यं तावकानं चरित्रं
निगदितुमसमर्थस्तत्त्वबोधस्वरूपे ।
भगवति तदपि त्वां भक्तिभाराकुलोऽहं
कथमपि जगदीशे स्तौमि मुक्तिस्थलस्थे ॥ १ ॥

सततविनतभक्तव्रातचित्ताम्बुजार्ति-
प्रशमनकुशलोद्यद्रागपादारविन्दे ।
अगतिरगसुतेऽहं त्वत्प्रसादाभिलाषी
भगवति नियतं त्वां नौमि मुक्तिस्थलस्थे ॥ २ ॥

जननमरणघोरक्ष्वेलवाराकरान्तः-
पतनविवशलोकत्राणदक्षान् कटाक्षान् ।
जननि तव दयार्द्रान् निन्दितेन्दीवराभा-
ननुदिनमाय मह्यं देहि मुक्तिस्थलस्थे ॥ ३ ॥

विशिष्टपदपङ्कजस्रुतमरन्दससवन-
प्रहृष्टधरणीसुरभ्रमरसञ्चयैरञ्चिते ।
त्रिविष्टपसमे गुणैर्महति मुक्तिगह स्थिता-
मभिष्टुतकथामुमामनिशमाश्रये शाश्वतीम् ॥ ४ ॥

---

* This is a Stotra in praise of the goddess of Muktipura. Muktipura seems to be the sanskritised form of Mūkkutala, a famous temple in Malabar. The present edition is based on a palm leaf manuscript No.804-B, preserved in this institution. Nothing is known about the authorship of the stotra. *Ed.*

अतित्वरमुदित्वरप्रणयपेशलालोकन-
प्रवृद्धकुतुकाकुलस्मरहराङ्गसङ्गोत्सुके ।
जगत्त्रितयभूषणं जननि मुक्तिगेहास्थिते
पदद्वितयमन्वहं मयि निधेहि शैलात्मजे ॥ ५ ॥

सरोजदळलोचनां सततलिप्तगोरोचनां
विनोदितगजाननां विमलपूर्णचन्द्राननाम् ।
नमामि गिरिनन्दनां नतविरिञ्चसङ्क्रन्दनां
विवेकिकृतभावनां विहितमुक्तिगेहावनाम् ॥ ६ ॥

सुरासुरनमस्कृते सुललिताङ्गदालङ्कृते
मुनीन्द्रनिवहादृते मुदितभक्तलोकावृते ।
मनोहरतराकृते मदनवैरिसम्मानिते
महेश्वरि नमोऽस्तु ते महितमुक्तिसद्मास्थिते ॥ ७ ॥

मनोज्ञनयनाञ्चलं मनसिजाहिते चञ्चलं
कुचद्वयजिताचलं घुसृणरञ्जितोरस्थलम् ।
महत्तमदयाकुलं मनसि मे सदा निस्तुलं
महः स्फुरतु निश्चलं महितमुक्तिगेहोज्ज्वलम् ॥ ८ ॥

मनोजन्मारातेर्महिषि महिषध्वंसिनि शिवे
दुनोम्यापन्नोऽहं मरणमनुचिन्त्यातिभयदम् ।
मनोज्ञं ते पादद्वयमरुणपाथोजसदृशं
विनोदाय स्यान्मे विलसिततना मुक्तिनिलये ॥ ९ ॥

भवाम्भोधिं घोरं विषयचयकल्लोलविषमं
जवादुत्तर्यार्तिव्यसनशमनात्यन्तनिपुणे ।
भवानि त्वन्नेत्रप्रसृतगुरुकारुण्यजलधौ
भवानि स्नातोऽहं दिवसमनु मुक्तिस्थलगते ॥ १० ॥

विमोहाद्यैर्बद्धो विवशतरचित्तोऽहमनिशं
प्रसादं ते लब्धुं परमसुखसन्दायिनि शिवे ।
रमानाथाम्भोजासनहरिहयाद्यादृतगुण
नमामि त्वां भक्त्या मुहुरपि च मुक्त्यालयगते ॥ ११ ॥

दुर्गां हतरिपुवर्गां दुर्गायितमुक्तिसदनसन्निहिताम् ।
भर्गादृतामुपासे सर्गावनहरणकर्तृभूतां ताम् ॥ १२ ॥

शम्बररिपुहरदयित तुम्बुरुभृगुनारदादिविनुतपदे ।
अम्बुरुहाक्षि सदा मामम्ब रमे पाहि मुक्तिगेहगते ॥ १३ ॥

स्मरशरनिकरविदारितपुरहरसुखवितरणातिनिपुणतनो ।
उरुतरदुरितमशेषं परिहर मम गौरि मुक्तिपुरलसिते ॥ १४ ॥

चण्डतराहितमण्डलखण्डनचण्डे नमोऽस्तु हतमुण्डे ।
कुण्डलमण्डितगण्डे चण्डहरे चण्डि मुक्तिगेहिनि ते ॥ १५ ॥

गिरितनये मयि रमतामरुणतरं चरणयुगलमनुदिवसम् ।
हरदयिते सुरमहिते वरमयि ते मुक्तिगेहपरिलसिते ॥ १६॥

अद्रीशनन्दिनि दयामृतवारिराशे
विद्रावितारिनिवहे नतलोकबन्धो ।
भद्रार्थदे निजपदाब्जजुषां जनानां
रुद्राणि मुक्तिनिलयाधिगते नमस्ते ॥ १७ ॥

कीनाशदण्डमनुचिन्त्य भयेन नित्यं
स्नानासनादिषु च नोत्सुकमानसं माम् ।
मेनाशयातिसुखदायिनि पाहि बद्धं
नानाशया जननि मुक्तिपुराधिवासे ॥ १८ ॥

सुम्भादिघोरतरवीरसुरारिवृन्द-
डम्भापहे नतजनावनलोलबुद्धे ।
जम्भारिवन्दितमुमे चरणद्वयं ते
सम्भावयामि हृदि मुक्तिनिकेतनस्थे ॥ १९ ॥

हस्तालसत्त्रिशिखकृत्तलुलायशस्त-
मस्तातिशोभितमनोज्ञपदारविन्दे ।
चित्ताम्बुजं मम पुनीहि समाश्रितानां
हृत्तापहारिणि लसत्तनु मुक्तिगेहे ॥ २० ॥

गर्वादिदोषरहिताशयसाधुलोक-
निर्वाणदाननिपुणे करुणापयोधे ।
सर्वापराधमपि मे सततं क्षमस्व
शर्वाणि मुक्तिपुरवासिनि शैलकन्ये ॥ २१ ॥

शरणागतस्य करुणानिधे शिवे
हर सारसाक्षि तरसा ममामयम् ।
चरणं त्वदीयमरुण हृदम्बुजे
कलयामि मुक्तिनिलयाधिवासिनि ॥ २२ ॥

उरुमेहरोगपरिमोहितः शिवे
करवै किमद्य पुरवैरिवल्लभे ।
विधिना हतं त्वमधुना सदैव मां
परिपाहि मुक्तिपुरवासलालसे ॥ २३ ॥

चरितानि देवि दुरितापहानि ते
परिकीर्तयानि सुरकीर्तितान्यहम् ।
अयि त महेशदयिते दया भवे-
दवनाय मुक्तिभवनाधिवासिनि ॥ २४ ॥

सजलाम्बुदनीलबालभारे निजलावण्यविमोहिताङ्गजारे ।
अचलाधिपनन्दने मतिः स्यादचला मे त्वयि मुक्तिगेहवासे ॥ २५ ॥

मदनान्तकवल्लभे शिवे ते वदनाम्भोरुहमेव सर्वदा मे ।
वितनोतु सुखं समन्दहासं सुतनो मुक्तिनिकेतनाधिवासे ॥ २६ ॥

गळसीमनि लम्बमानशुम्भत्तुळसीदामलसद्भुजान्तराळम् ।
कळभाषिणि भासतां मदन्तः कळभामोदिनि मुक्तिगेहगे ते ॥ २७ ॥

गजकुम्भमदापहं त्वदाय कुचकुम्भद्वयमम्ब मानसे मे ।
रथडम्भहरं नितम्बबिम्बं सततं भातु च मुक्तिसद्मसंस्थे ॥ २८ ॥

गजराजकराद्दतोरु मोदादजराराधितपादपङ्कजे त्वम् ।
रुचिराङ्गि शिवे भवान्धकूपादचिरादुद्धर मुक्तिगेहगे माम् ॥ २९ ॥

शरणागतलोकपारिजातावरुणावाजिविधावपारिजाता ।
मरणाधिहरौ शिवे त्वदीयौ चरणौ मुक्तिपुरस्थिते भजेयम् ॥ ३० ॥

ललितां पदशोभिनूपुरोद्यत्कलनादामृतशीतलीकृताशाम् ।
कलहंससमादृतां गतिं ते कलये चेतसि मुक्तिगेहगेऽहम् ॥ ३१ ॥

मुखचन्द्रविनिर्गतां स्मितार्द्रामवहन्तीममृतोपमां गिरं ते ।
सुखदां शृणवान्यहं विहातुं निखिलार्तिं लसिताङ्गि मुक्तिगेहे ॥ ३२ ॥

नतमोहतमोपहे निजानां हितदे हे हतदेववैरिदेहे ।
अतिशोभितगात्रि मुक्तिगेहे सदयं मामवलोकयानुवेलम् ॥ ३३ ॥

चिकुरादिपदान्तमम्ब चेतोमुकुरान्तः सततं दिदृक्षुमनम् ।
अगराजसुते शिवे त्वमापन्निकरान्मामव मुक्तिगेहसंस्थे ॥ ३४ ॥

मन्मथारिदयिते दयानिधे सन्मनःकुमुदवृन्दचन्द्रिके ।
कल्मषावलिमुमे हराशु मे चिन्मयि त्वमयि मुक्तिगेहगे ॥ ३५ ॥

मुक्तिमन्दिरगते नगात्मजे भक्तलोककमनीयविग्रहे ।
मुक्तिदायिनि भवानि देहि मे भक्तिमेव तव पादपद्मयोः ॥ ३६ ॥

मृत्युतापहरणामृतं नृणामत्युदारमयि ते पदाम्बुजम् ।
नृत्यतादिह मदीयमानसे नित्यदा जननि मुक्तिगेहगे ॥ ३७ ॥

भुवनमङ्गलदीपसमुज्ज्वले भवविषानलदग्धमिमं जनम् ।
तव कृपामृतवृष्टिभिरञ्जसा भवति जीवय मुक्तिपुरस्थिते ॥ ३८ ॥

गदसमूहमपोहितुमम्ब त पदसरोजरजोनिचय मुदा ।
वितर मुक्तिनिकेतगते जवादितरदद्य न मे शरणं शिवे ॥ ३९ ॥

दुरितवारिधिसन्तरणाय ते चरितकीर्तनपोतमुपाश्रितम् ।
स्फुरितमुक्तिनिकेतनसङ्गते त्वरितमेनमुमे परिपाहि माम् ॥ ४० ॥

मलयजालसितं शुभदं त्विषां निलयमम्ब तवाननपङ्कजम् ।
सुललितं नियतं हृदि भावये विलसिते वरमुक्तिनिकेतने ॥ ४१ ॥

जनिमृत्युविनाशिनि पादजुषां मुनिसत्तमसन्नुतसच्चरिते ।
मनसः स्थितिरस्तु ममाविरतं जननि त्वयि मुक्तिनिकेतगते ॥ ४२ ॥

उररीकृतभक्तजने शिवद गिरिराजसुते मम गारि शिवे ।
कुरु रोगविनाशनमाशु शिवे गुरुरागिणि मुक्तिनिकेतगते ॥ ४३ ॥

वरमाल्यसमुज्ज्वलमुक्तिपुरे सुरमानवमानितपादयुगे ।
हरमानसमानसमाधिहरे हर मामकमामयमाशु शिवे ॥ ४४ ॥

इभगामिनि कामिनि कामरिपोः शुभदायिनि दानवनाशिनि माम् ।
परिपाहि कृपामृतवारिनिधे परमेश्वरि मुक्तिनिकेतगते ॥ ४५ ॥

उदाररूपे हितदानशीले पदारविन्दे परचिन्मये ते ।
मुदा रमेणाङ्कधरानुरक्ते सदा रमे मुक्तिपुराधिनाथे ॥ ४६ ॥

सरागयोस्ते पदयोर्महाजना निरागसः सन्ति परागसेवया ।
सरोगमेनं परिपाहि मां शिवे सुरागवन्मुक्तिपुरे विराजिते ॥ ४७ ॥

सुखावहं नित्यमघापहं शुभं मुखाम्बुजं देवि पदाम्बुजञ्च ते ।
सुखेषु दुःखेषु मदीयमानसे चकास्तु मुक्तिस्थलसंस्थिते शिवे ॥ ४८ ॥

प्रसीद विश्वेशि रमेशमाये प्रसीद शश्वत् परमेशजाये ।
प्रसीद भक्तप्रियदानशीले प्रसीद मुक्तिस्थलवासलोले ॥ ४९ ॥

नमोऽस्तु कारुण्यपयोनिधे ते नमोऽस्तु तारुण्यमनोहरे ते ।
नमोऽस्तु मृत्युञ्जयवल्लभे ते नमोऽस्तु मुक्तिस्थलसङ्गते ते ॥ ५० ॥

नमो नमः पर्वतकन्यकायै नमो नमः शर्ववरप्रियायै ।
नमो नमो मुक्तिसुखप्रदायै नमो नमो मुक्तिपुरस्थितायै ॥ ५१ ॥

मातः स्तवं पठति मङ्गलदं य एतं
प्रातः प्रबुद्ध्य भवतीमनुचिन्त्य नित्यम् ।
प्रीतः स मुक्तिपुरवासिनि भक्तियुक्तो
याति क्षणेन तव पादसरोजमेव ॥ ५२ ॥

# श्रीमधुरापुरीस्तुतिः* ।

श्वेतद्वीपमधिष्ठिता सुविपुला सा सत्यलोकस्थिता
चायोध्या च कुशस्थली मधुपुरीत्यत्युज्ज्वला निस्तुलाः ।
पञ्च श्रीकमितुः प्रपञ्चकुहरे पुर्यः स्फुरन्ति स्फुटं
तासां मध्यगता विभाति मधुरा सा हन्त सर्वोत्तरा ॥ १ ॥

काञ्ची काशिपुरी च सा पुनरयोध्या सापि चावन्तिका
मायाख्या च कुशस्थली मधुपुरीत्यत्यन्तपुण्योत्तराः ।
पुर्यः सप्त समुल्लसन्ति परितः क्षोणीतले तास्वहो
मध्यस्था मधुरा विराजति सरोमध्ये यथाम्भोरुहम् ॥ २ ॥

वृन्दारण्यबृहद्वनं मधुवनं तालाटवी श्रीवनं
भद्राख्यं कुमुदाटवी च बकुलारण्यञ्च लोध्राटवी ।
भाण्डीराख्यवनं तथैव खदिरारण्यञ्च काम्याटवी-
त्येतैर्द्वादशभिर्वनैः परिवृता जेजेति सा भूतले ॥ ३ ॥

योगीन्द्राहृतपुण्यतोयभरिता भागीरथीसङ्गता
कालिन्दी परिखेव यत्र सरितामग्रेसरी भासते ।
श्रीगोवर्धनरोहितादिभिरगश्रेष्ठैश्च गोष्ठैर्वृता
सा गोपालपुरी विभाति मधुरा नाम प्रपञ्चोदरे ॥ ४ ॥

---

* स्तुतिरियं 'कूटल्लूर् मन' इति सुगृहीतनाम्नः नम्पूतिरिब्राह्मणाद्यात् सम्पादिते ३७५ अङ्काङ्किते ताळीपत्रग्रन्थे अन्तर्गता ।

निर्मान्ति स्मातिरम्यामहह दिविषदो यां पुरैवादिकाले
धर्मासक्तान्तरात्मा बहुयुगमवसद्यत्र मध्वाख्यदैत्यः ।
निर्मायैर्मानवौघैस्सततपरिगता निर्मला शर्मदात्री
सेयं निर्वाणभूमिर्जयति मधुपुरी सर्वगीर्वाणसेव्या ॥ ५ ॥

दिव्यां दिव्यैकभोग्यां मणिगणकिरणापूरिताशेषलोकां
मर्त्यानां दुर्विलोकां मधुसुतमथने यां पुरा कोसलेन्द्रः ।
गीर्वाणानां प्रसादादकृत निजपुरीं धिक्कृतस्वर्गलोकां
तां साक्षाद् ब्रह्मगोपालकदयितपुरीमीक्षिताहे कदा नु ॥ ६ ॥

यत्राविर्भूय भूयस्तरनिजकलया गूढमध्यास्त गोष्ठं
यामेवाभ्येत्य भूयः क्षितिपतिमकरोदुग्रसेनं मुरारिः ।
यामग्रे शूरसेनश्चिरमनुबुभुजे वज्रमुख्यास्तथान्ते
सेयं वृष्णीश्वरस्य प्रियतमनगरी लालसीति त्रिलोक्याम् ॥७॥

दृष्टात्मा मुष्टिकारिप्रमुखयदुवरैर्ष्टसाहस्रयोषा-
जुष्टः सम्मृष्टशक्रोपलतुलितरुचिर्यत्र चिक्रीड चक्री ।
चक्राद्यैश्शस्त्रजालैरमितनिजमहश्चक्रविद्योतिताशा-
चक्रैरापालिता सा जयति मधुपुरी शक्रमुख्यैर्निषेव्या ॥ ८ ॥

यस्यां यत्सन्निधौ वा क्वचिदपि विपिने यां परीत्य स्थितासु
द्वावत्याद्यासु वापि प्रथितहरिहरक्षेत्रतीर्थाङ्कितेषु ।
प्रेता जाताः स्थिता वा न खलु शमलवन्तोऽपि पश्यन्ति घोरान्
प्रेताधीशस्य दूतानपि बत मधुरां तां व्रजेमाशुभान्ताम् ॥९॥

व्युष्ट्यां दिष्ट्यापि यस्याः स्मृतिरखिलनृणां हन्त नक्तन्दिवान्त-
र्जातं सर्वाघजातं क्षपयति तरसा मङ्गळश्चातनोति ।
सेयं श्रेयस्स्वरूपा दिनकरदुहितुः पश्चिमे तीरभागे
गाढं बाभाति पृथ्वीकुचभरकलिता चन्द्रलेखेव पृथ्वी ॥१०॥

नित्यं यत्र परिस्फुरत्सु नितरां पुण्येष्वरण्येष्वहो
रामाद्या निवसन्ति दैवतगणोपास्या हरेर्मूर्तयः।
नृत्यन्त्यप्सरसः सहामरगणैरत्यन्तहर्षोदया-
दित्थम्भूतमहोदया मधुपुरी जेजेति सा भूतले ॥ ११ ॥

दृश्या विष्णुपदोज्ज्वला सुविमला निश्शेषतापार्दिनी
शश्वद्विश्वजनेषु चिद्रससुधानिष्यन्दसन्दोहिनी ।
कालिन्दीसरिदम्बुबिम्बितकलानाथार्धबिम्बोपमा
मौकुन्दी परिलालसीति नगरी सेयं धरित्रीतले ॥ १२ ॥

या गुप्ता मधुना पुरा मधुपुरीत्याख्यामवाप स्फुटां
सद्यः पापनिमन्थनेन मथुरेत्याख्यायते या बुधैः ।
यां लोके मधुरेति चाभिदधते माधुर्यसर्वङ्कषां
वृष्णीनां नियता पुरी विजयते सेयं धरामण्डले ॥ १३ ॥

उद्यद्विक्रमशालिनां निजयशःप्रद्योतशौर्योष्मभिः
खद्योतीकृतलोकपालमहसां चक्रायुधालम्बिनाम् ।
आवासात्किल शूरसेननृपतीनां शौरसेनीति सा
विख्याता भुवने विकुण्ठभवनप्रख्या विजेजीयते ॥ १४ ॥

यस्यां ध्यातुर्मुकुन्दः प्रदिशति भगवानाशु मुक्तिं विशेषा-
द्यस्यामष्टच्छदाढ्या विकसति विलसच्चित्तपद्मं त्रिलोक्याः ।
यस्यां तिष्ठन्ति हृष्टास्सततमपि हरिं द्रष्टुमष्टौ दिगीशा
विश्वोत्कृष्टा सुपुष्टा विलसति मधुरा नाम सा राजधानी॥१५॥

अश्रान्तानन्तशक्तेः पशुपकुलशिशोर्नित्यलीलानिकेतै-
र्विश्रान्त्याद्यैः पवित्रैर्हरिहरगिरिजामन्दिरैरङ्कितायाम् ।
अश्रान्तं हन्त विश्वेश्वरमहितमहाविष्णुपुर्याममुष्यां
विश्रान्तिं स्वान्त! कुर्यास्त्वमिह भवपथे मा वृथैव व्यथेथाः ॥१६॥

यस्यां भीमोर्मिचक्राहतिमतिपरुषां दूरतो वारयन्त्यां
श्रीमद्वैकुण्ठनामा पशुपकुलशिशुः कोऽपि सत्कर्णधारः ।
कालिन्दीतीरनिष्ठां यदुपतिनगरीनामधेयां गरिष्ठां
संसाराब्धेस्तरीं तामतुलसुखकरीं गाढमद्यावलम्बे ॥ १७ ॥

यस्यां हा हन्त विश्वाद्भुतमनुजकिशोराकृतेश्चक्रपाणे-
र्लीलावंशीरवास्वादनपरमचिदानन्दसिद्धा निमग्नाः ।
योगीन्द्रास्ताद्विकुण्ठास्पदमभिलषितं नाधिरोढुं क्षमन्ते
तस्यै गोपालपुर्याः शिव शिव! महिमोद्रेकसीम्ने नमोऽस्तु॥१८॥

गाढोद्भासिकुशस्थलीमुखजगन्नाथाधिवासस्थली
मध्यस्थं निजरोचिषैव हरितामापूरयन्मण्डलम् ।
श्रीमन्माथुरमण्डलं विजयते मध्येधरामण्डलं
ज्योतिर्मण्डलमध्यगं दिवि यथा तारापतेर्मण्डलम् ॥ १९ ॥

श्रीगोपालकमूलमूर्तिरमला सारा सलीलोत्सुका
तारुण्योदयरामणीयकहठाकृष्टत्रिलोकीमनाः ।
यस्मिन् खेलति वेणुनादलहरी निर्भर्त्सिताशामुखा
तस्मिन् माथुरमण्डले भवतु मे गुल्मादिजन्मापि वा ॥२०॥

इत्येतां मधुरापुरीस्तुतिकथां श्रुत्यन्तसारोदितां
प्रत्यूषे प्रतिबुध्य शुद्धमनसा नित्यं पठन् मानवः ।
मृत्योर्मस्तकटार्पिताङ्घ्रिरखिलान् भुक्त्वेह भोगोत्करा-
नत्युत्कृष्टमकुण्ठधाम तदहो वैकुण्ठधाम व्रजेत् ॥ २१ ॥

---

॥ श्री ॥

# आर्याशतकम् ।

( शार्ङ्गोद्याननिवासिन्यम्बस्तवः । )

आर्यां परमैश्वर्यां धार्यां हृदये महद्भिर्ऋषिवर्यैः ।
मर्यादातीतगुणौदार्यां शम्भोः समाश्रये भार्याम् ॥ १ ॥

गाङ्गेयसमाभाङ्गीं गङ्गारङ्गोत्तमाङ्गतन्वङ्गीम् ।
शार्ङ्गोद्यानसुभङ्गीमङ्गीकुर्मोऽन्तरेण मातङ्गीम् ॥ २ ॥

करुणार्द्रनयनकोणां तरुणाम्भोजन्मरम्यचरणयुगाम् ।
हरिणाङ्कचूडरमणीमरुणाभां देवतां परामीडे ॥ ३ ॥

निहतामरारिवर्गां निर्धूतनमज्जनारिषड्वर्गाम् ।
कलयेऽहं वनदुर्गां कारुण्यसुधार्द्रलोचनविसर्गाम् ॥ ४ ॥

---

*The Āryāśataka in praise of the Goddess of the Śārṅgodyāna temple (Cāmakkāvu temple near Pandalam, Chenganoor Taluq) is based on a Ms. (No. 16620 B) in this Library which originally-belonged to the Kilimānūr Palace. The work consisting of a century of verses composed in the metre Āryā remains anonymous at present. It is evident from the heartfelt devotion which pulsates in every line of the work that the author was a great devotee of the Goddess. The rich vocabulary and the melody of diction show that the work is from the pen of a poet of no mean merit.*

कारुण्यपरमकोटिं कोटीराबद्धहिमकरवधूटीम् ।
पाटीरसुरभिशाटीं गाढीकुर्मोऽन्तरुल्लसन्मकुटीम् ॥ ५ ॥

मन्दस्मितार्द्रवदनां मन्दारलतां पदारविन्दजुषाम् ।
इन्दीवरदलनयनामिन्दुकलापीडसुन्दरीं वन्दे ॥ ६ ॥

दलितेन्दीवरनयनां गलितकलङ्कोडुराजसखवदनाम् ।
अलिकलभविलसदलकामलिकाक्षप्रेयसीं भजे काळीम् ॥ ७ ॥

अम्बां जगदवलम्बां बिम्बाधरकान्तिविजितबन्धूकाम् ।
लम्बाळकनिकुरुम्बां लम्बोदरमातरं समालम्बे ॥ ८ ॥

सम्भाविताङ्घ्रिकमलां जम्भारिप्रमुखसर्वगीर्वाणैः ।
अम्भोरुहदलनयनां शम्भोः सम्भोगसम्पदं वन्दे ॥ ९ ॥

करिकलभकुम्भविलसत्कुचकुम्भां सम्भ्रमत्कुसुम्भाभाम् ।
अम्भोजासनविनतामम्भोजाताक्षसोदरीं वन्दे ॥ १० ॥

आशासितफलदात्रीमाशापालाभिवन्दिताङ्घ्रियुगाम् ।
नाशायाशेषविपद्राशीनामीशवल्लभां कलये ॥ ११ ॥

पङ्कजसंभवविनतामङ्काविहीनेन्दुबिम्बसमवदनाम् ।
कुङ्कुमसमानवर्णां शङ्करवरवर्णिनीं समालम्बे ॥ १२ ॥

कुलिशायुधमुखविनुता कलशाम्भोराशिशायिसहजाता ।
कुलशैलवरतनूजा फलशालीदं तनोतु मे जन्म ॥ १३ ॥

पार्वणसुधांशुमण्डलगर्वसमूलापहरणनिपुणमुखीम् ।
पर्वतपरिवृढकन्यां सर्वजगन्नायिकामहं वन्दे ॥ १४ ॥

संसारसागरतरीं पुंसां हंसातिशायिमृदुगमनाम् ।
शंसन्मणिमञ्जीरां संसेवे सर्वमङ्गलां नित्याम् ॥ १५ ॥

एणाङ्ककलितचूळीं वाणीमाधुर्यनिर्जितमधूळीम् ।
एणीसमाक्षिकेळीं प्रीणीमः प्रेक्ष्य गिरिशपुण्याळीम् ॥ १६ ॥

कल्याणशैलनिलयां चिल्लयाहितविश्वसृष्टिगुप्तिलयाम् ।
कल्याणीं हरजायां तुल्यातीतां समाश्रये विजयाम् ॥ १७ ॥

नळिनान्तर्दळनयना पुलिनाहङ्कारहारिपृथुजघना ।
मलिनेतरमृदुवसना फलिनं कुर्यान्ममेप्सितमपर्णा ॥ १८ ॥

धन्यां गिरिवरकन्यां मुरहरमान्यां भजाम्यसामान्याम् ।
निहतासुरवरसैन्यामितराश्रयशून्यसज्जनशरण्याम् ॥ १९ ॥

काळीं कल्लोललसच्चिल्लीयुगलीं मनोज्ञतनुवल्लीम् ।
कचकलितचारुमल्लीं कलय शम्भोः शिरोलिपिमतल्लीम् ॥ २० ॥

कलये कुलगिरिपरिवृढकलिततपोदानराशिपरिपाकम् ।
मौलिलसदिन्दुपाकं दलितवलारातिवैरिवरलोकम् ॥ २१ ॥

बालार्करुचिररत्नं हेलानिःशेषिताखिलसपत्नम् ।
कलय चिन्तारत्नं कुलगिरिराजन्यजन्यसद्रत्नम् ॥ २२ ॥

बलिमथनधातृपूज्यं मलिनेतरचित्तवृत्तिहृद्भोज्यम् ।
कलये सुतरां प्राज्यं कालप्रध्वंसिसुकृतसाम्राज्यम् ॥ २३ ॥

नवरविकिरणारुण्यं नतजनविश्रान्तपरमकारुण्यम् ।
तुलितेतरलावण्यं कलये कैलासवासिनैपुण्यम् ॥ २४ ॥

कलये निजपदभाजां सुलभां कळभापहासिकळगमनाम् ।
अळिभास्वत्कबरीकां हरभार्यां मकुटशोभि(शिशुरशशि)भार्याम् ॥२५॥

याने कळहंसमयीं भाने बालार्ककोटिकिरणमयीम् ।
सञ्चिन्तये भवानीं सन्तानलतामभीष्टफलदाने ॥ २६ ॥

निखिलजगज्जनयित्रीं कुवलयसङ्कोचदानपटुनेत्रीम् ।
कलये करुणापात्रीं कुलपर्वतराजजन्मफलदात्रीम् ॥ २७ ॥

करुणासारनिधानं कनकसमाभिख्यमुख्यपरिधानम् ।
कलयेतरां प्रधानं कण्ठेकालस्य भव्यमपदानम् ॥ २८ ॥

नेत्रे कारुण्यवतीमारुण्यवतीं मनोज्ञतरगात्रे ।
स्तोत्रे निजभक्तानामामोदवतीं भजामि हैमवतीम् ॥ २९ ॥

नवमणिकुण्डलकर्णां नळिनासनवासवादिकृतवर्णाम् ।
कमनीयहेमवर्णां करुणापूर्णां समाश्रयेऽपर्णाम् ॥ ३० ॥

आद्यामपि चानाद्यामनवद्यां श्रुतिशिरःशतैर्वेद्याम् ।
स्वर्गापवर्गपद्यां हृद्याकारां स्मरामि सद्विद्याम् ॥ ३१ ॥

सम्भरितभूरिकरुणं जम्भारिप्रमुखसेव्यमृदुचरणम् ।
सम्भावये पुराणं शम्भोस्सम्भोगयोग्यमाभरणम् ॥ ३२ ॥

चित्ररुचिनेत्रपाळीकेळीलाळित्यलाळितकपालिम् ।
करुणाशालि विशालं कलये प्रालेयशैलपुण्यफलम् ॥ ३३ ॥

विमथितविबुधातङ्कां हिमकरमार्ताण्डकलितताटङ्काम् ।
मकुटालसन्मृगाङ्कां कलये विद्ध्वस्तभक्तहृत्पङ्काम् ॥ ३४ ॥

भुजधृतमणिमयवलयामलयां निर्धूतनम्रलोकभयाम् ।
निरवधिदयाममेयां हरजायामाश्रय महामायाम् ॥ ३५ ॥

खद्योतितादिमोद्यत्प्रद्योतनकोटिविग्रहमयूखाम् ।
मौलिधृतचन्द्रलेखां कलयेऽहं खण्डपरशुवृषरेखाम् ॥ ३६ ॥

सद्रक्षणात्तनिद्राविद्रावितरौद्रदैत्यवरवीरा ।
भद्राणि मे प्रदेयाद्रुद्राणी शमयताच्च हृद्रोगान् ॥ ३७ ॥

दुर्जनसज्जनशिक्षारक्षादक्षा चराचराध्यक्षा ।
दाक्षायणीह रक्षेत् पक्षान्तर्क्षेशदानदक्षास्या ॥ ३८ ॥

हरिविधिविहितादरणां हरिहयगोपारुणांशुकावरणाम् ।
हरिदीशवन्द्यचरणां हरिणाक्षीं नौम्युमां वराभरणाम् ॥ ३९ ॥

कुण्डलमण्डितगण्डा खण्डितचण्डतरचण्डमुण्डबला ।
शुण्डोपमोरुकाण्डा खण्डतान्मे भयानि चामुण्डा ॥ ४० ॥

आर्तार्तिहरणदीक्षा धात्राद्यैः कीर्तनीयगुणवार्ता ।
कात्यायनीह रक्षेन्नेत्रान्तालोकलेशमात्रेण ॥ ४१ ॥

हारीभूताहीश्वरनारीं सौन्दर्यवारिनिधिलहरीम् ।
ऊरीकरोमि गौरीं नारीलोकाभिमानमूलहरीम् ॥ ४२ ॥

खर्वेतराणि भूयस्सर्वविनिन्द्यान्यशर्ममूलानि ।
सर्वाणि शमयतान्मे शर्वाणी झटिति दुरितकर्माणि ॥ ४३ ॥

पिष्टातिदुष्टलोका शिष्टैस्तोष्टूयमानगुणकाष्ठा ।
इष्टा प्रियाष्टमूर्तेः कष्टावस्थां पिनष्टु मे हृष्टा ॥ ४४ ॥

निष्कासितारिसार्थं निर्मूलितसकलसज्जनानर्थम् ।
सर्वागमपरमार्थं संसेवे शर्वभोगपरमार्थम् ॥ ४५ ॥

पदनखरुचिविभ्राजितसकलदिगन्तं सुमङ्गलोदन्तम् ।
कलयेऽहमनाद्यन्तं श्रुतिसिद्धान्तं त्रिशूलिशुद्धान्तम् ॥ ४६ ॥

निर्धूतनिखिलबाधं निर्जरवैरिप्रसारितक्रोधम् ।
कलये निरवधिबोधं कालारातेः प्रधानमवरोधम् ॥ ४७ ॥

करुणासुधारसार्द्रा कमनीयरुचा निराकृतहरिद्रा ।
पदकमलनमितरुद्रा रुद्राणी मे हिनस्तु दारिद्र्यम् ॥ ४८ ॥

परिकलितहेमकाञ्ची करतलधृतचापबाणसृणिपाशा ।
परिणतशरदिन्दुमुखी करिकुम्भकुचा विभातु गिरिशसखी ॥४९॥

रात्रीसगोत्रगात्री रात्रीशहुताशसवितृनेत्री माम् ।
धात्रीधरेन्द्रपुत्री पात्रीकुर्यात् कटाक्षमात्रस्य ॥ ५० ॥

मुष्णातु समुदितोदयदुष्णांशुसहस्रकोटिरोचिष्णुः ।
कृष्णानुजान्तरुष्णं विष्णुविरिञ्चादिपूजिताभीक्ष्णम् ॥ ५१ ॥

मुनिहृदयविहितलास्यं मुखरुचिरचितेन्दुमण्डलालस्यम् ।
कलितानतजनदास्यं कलये कैलासनिलयसारस्यम् ॥ ५२ ॥

कनकमयकुण्डलाङ्गदकाञ्चीदामाभिरामतमसुषमा ।
दिशतु मम लोकमाता सीमातीतामचञ्चलां लक्ष्मीम् ॥ ५३ ॥

दुग्धहविर्मधुमद्यैश्चातुर्वर्ण्येन तर्पिताघ्यर्घम् ।
सकलं परापरमयी सफलं कुर्यान्ममेप्सितं त्रिपुरा ॥ ५४ ॥

वलमथनकुवलयाक्षीं चिकुरभरभ्रमरमुखरचरणयुगाम् ।
कुलशैलराजचेतःकुमुदशरच्चन्द्रचन्द्रिकां कलये ॥ ५५ ॥

अन्धकपरिपन्थिमनःक्षीरधिमन्थानशैलपृथुलकुचाम् ।
सिन्धुरपरिवृढबन्धुरमन्थरगमनां स्मरामि जगदम्बाम् ॥ ५६ ॥

परमेशचित्तमदगजनिगलायिततरलचिल्लियुगलं मे ।
विदलयतु निखिलदैन्यं मदनमहावीरगर्वसर्वस्वम् ॥ ५७ ॥

कलयतु विशदतराभा जपपटवरपुस्तकाभयाढ्यभुजा ।
रसनाग्रं मम रङ्गं माध्वीमाधुर्यधुर्यभणितीनाम् ॥ ५८ ॥

कारणभूता जगतः पालनसंहारकरणधौरेया ।
व्रातं ममाशु विपदां माता लोकस्य सञ्जरीहर्तु ॥ ५९ ॥

वरिवसितधृतपिनाकां निरुपमकारुण्यसम्पदतिरेकाम् ।
कुलशिखरिवरपताकां कलये नमदमितविसरदवलोकाम् ॥ ६० ॥

प्रालेयजालशीतलशैलकुलोत्तंसचारुकलिके ! माम् ।
कालं निरस्य कारुण्यालोकनलेशभाजनं कुर्याः ॥ ६१ ॥

कैलासशैलनिलयनकारुण्यकटाक्षमूलिके ! तुभ्यम् ।
कलयामि नमोवाकं करुणां कुरु कालयापनमपास्य ॥ ६२ ॥

दरदलितनीलकुवलयदलकुलविलसद्विलोचनद्वन्द्वाम् ।
कलये विषमविलोचननयनचकोरेन्दुकौमुदीं हृदये ॥ ६३ ॥

परमशिवचित्तधैर्यक्षितिधरसन्दलनशातशतकोटिः ।
वैरिगिरिपटलिकां मे वलरिपुसम्भाविता विदारयतात् ॥ ६४ ॥

प्रसरतु ममान्तरङ्गे प्रतिपदभोग्या भिषक्तमस्य सदा ।
भवरोगभीतसव्या दिव्यौषधिका तुषारगिरिजन्या ॥ ६५ ॥

तुहिनगिरिकीर्तिसंपच्चरणसरोजातयुगळवरधूळिः ।
भुवनतलपावनी मे विमलीकुर्यान्मनोमणीमुकुरम् ॥ ६६ ॥

वलमथनविटपिसुरभिलनवसुमपरीहासिचिकुरसौरभ्याम् ।
स्मरदहनभाग्यसीमां निरतिशयानन्दकन्दलीं वन्दे ॥ ६७ ॥

कालिन्दीजलवेणीमालिन्यविधानधीरतरवेणीम् ।
मकरन्दमधुरवाणीमाणिक्यमणीं स्मरामि शर्वाणीम् ॥ ६८ ॥

लोलम्बडिम्भसंहतिसम्भ्रमसन्दायिविसरदलकभराम् ।
निटिलतलविजितवैधवकुटिलकलां सर्वमङ्गलां कलये ॥ ६९ ॥

कारुण्यसरससागरमृदुलहरीपरिणतोल्लसच्चिल्लीम् ।
फुल्लेन्दीवरसोदरसुन्दरनयनां स्मरामि चिल्लहरीम् ॥ ७० ॥

करुणासुधाम्बुधाराशिशिरतरोदारकोमलकटाक्षाम् ।
नासाग्रकलितमणिमयभूषणसारां परां कलां कलये ॥ ७१ ॥

गण्डतलमुकुरबिम्बितकुण्डलिताकेन्दुमण्डलां कलये ।
खण्डपरशूर्जिततपोमण्डलसाम्राज्यपरमसीमानम् ॥ ७२ ॥

विशदतरदशनदीधितिनिन्दितकुन्देन्दुचातुरीलहरीम् ।
शिशिरकरशकलशेखररोषग्रीष्मोष्मचन्द्रिकां वन्दे ॥ ७३ ॥

अरुणांशुदशनवसनज्योतिष्प्रसरातिशोणितदिगन्ताम् ।
शितिकण्ठेनातर्पणसरसास्वादितामृताधरां कलये ॥ ७४ ॥

शारदपार्वणहिमकिरणाशासितदास्यसुन्दरतरास्याम् ।
कलयामि कुलगिरीश्वरविरचितपरमशिवचरणवरिवस्याम् ॥ ७५ ॥

अतिललितगळतलाश्रितधवळतरोदारहारिमणिहाराम् ।
कलयामि निटिललोचननयनालीचन्दनादिगुलिकालीम् ॥ ७६ ॥

करिकुम्भकनककलशाडम्बरसम्बाधिसाधुकुचकुम्भाम् ।
स्मरमथनचित्तशमधनतास्कर्यकलां कृपाकुलां कलये ॥ ७७ ॥

शम्भुकृतसुकृतसम्पत्सम्भृतसौवर्णकुम्भकुचकुम्भाम् ।
निटिलनयनपरिकांक्षितदृढपरिरम्भां स्मरामि जगदम्बाम् ॥ ७८ ॥

रुचिरतरकनकवल्लीसाष्टाङ्गप्रणतभुजततिमतल्लीम् ।
अमरपरिपन्थिवर्गप्रतिभयतरकाळरात्रिमाकलये ॥ ७९ ॥

आनीलरोमवल्लीक्षुल्लीकृतवनपिपीलिकावलिकाम् ।
क्षोणीधरेश्वरयशश्चन्द्रमसः पूर्णिमामुमां प्रणुमः ॥ ८० ॥

शोणनदावर्तरुचिश्रेणीभयदायिनिम्नशुभनाभीम् ।
सायन्तनघनपटलीशोभनवसनां स्मरामि हरसेनाम् ॥ ८१ ॥

कटितटघटितस्फुटरुचिकनकमणीकाञ्चिदलिततटिदाभाम् ।
कुटिलेन्दुमकुटमञ्जुलमञ्चां सञ्चिन्तये कलां काञ्चित् ॥ ८२ ॥

हस्तिवरमस्तकविभवजित्वरविस्तारिहारिजघनभराम् ।
निस्तुलसौन्दर्यसुधारत्नाकरसम्पदं स्मरेदम्बाम् ॥ ८३ ॥

विकटाक्षचित्तमन्मथविकृतिविधानैकतानसुनितम्बाम् ।
कलयामि भुवनमण्डलमन्दिरमणिदीपिकां महामायाम् ॥ ८४ ॥

कुम्भिकरराजरम्भासम्भावितसुरुचिरोरुवरकाण्डाम् ।
सम्भावये निसुम्भाद्यसुरमहारण्यदवशिखिज्वालाम् ॥ ८५ ॥

जानुमयहेमसम्पुटसंसज्जद्धक्तचित्तमणिमुकुराम् ।
भानुहिमभानुकृशानुलोचनसहधर्मिणीं नमस्कुर्मः ॥ ८६ ॥

जङ्घाप्रकाण्डशोभासङ्घास्तमितोच्चकनकदण्डाभाम् ।
हुङ्कारभस्मितासुरजृम्भितबलपटलिकां कलां कलये ॥ ८७ ॥

मञ्जुलशिञ्जानमणीमञ्जीरस्फुरणरञ्जितपदाब्जाम् ।
कञ्जशरवैरिचेतस्सरसिजकलहंसयोषितमुपासे ॥ ८८ ॥

प्रपदप्रभाप्रकाण्डप्रोत्सारितकच्छपच्छविप्रसराम् ।
प्रणुमः प्रालेयगिरिप्रचुरतपःप्रकरनैपुणीश्रेणीम् ॥ ८९ ॥

चरणनमदमरपालीमौलीमाणिक्यरञ्जितनखालीम् ।
नखचन्द्रिकानिरस्तप्रणततमोमण्डलीं कलां कलये ॥ ९० ॥

सुरविटपिमृदुललोहितकिसलयवैकल्यकलनपटुचरणाम् ।
कलयामि चरणकान्तिप्रसरनिरस्तारुणाम्बुजामम्बाम् ॥ ९१ ॥

मणिमयकिरीटकुण्डलकेयूरोदारहारकटकाद्यैः ।
रुचिरैर्भूषणसारैर्भूषितवेषां स्मरामि हरयोषाम् ॥ ९२ ॥

कलयामि कालयक्षीं करतलविलुठत्कराळकरवाळाम् ।
कूळीगणैः परिवृतां काळीपरिवारमण्डलीमौलीम् ॥ ९३ ॥

स्फुटरुचिविटपिविशेषैः पटुतरनिनदैः प्लवङ्गमैश्च भृतम् ।
कलये शार्ङ्गोद्यानं कात्यायन्याः सुखासिकास्थानम् ॥ ९४ ॥

हारिद्ररुचिसमाभा निर्निद्रा दीनरक्षणे माता ।
सौरद्रवीं मयि धुरं दारिद्र्यव्याकुले द्रुतं वहतु ॥ ९५ ॥

भूर्यद्रिमौलिनिलया भूरिद्रविणौघवृष्टिभिर्माता ।
दारिद्र्यघर्मतप्तं मां रुद्राण्यभिषिञ्चतात् क्षणेनैव ॥ ९६ ॥

वन्यां दैन्यौघमयीं धन्या निर्मूलयेत् समूलं मे ।
कन्या तुषारपर्वतजन्या गुण्या कटाक्षशस्त्रेण ॥ ९७ ॥

सर्गस्थित्यन्तकरी जगतः स्वर्गापवर्गदात्री मे ।
दौर्गत्यशिखरिकूटान् दुर्गा भिन्द्यात् कटाक्षकुलिशेन ॥ ९८ ॥

शार्ङ्गोद्यानिवासिनि मातः परदेवते महामाये! ।
करुणां कुरु मयि दीने कालविलम्बं सुदुस्सहं न सहे ॥ ९९ ॥

शार्ङ्गोद्याननिवासिनि कात्यायिनि! नः कुरुष्व कल्याणम् ।
करुणामृतपरिवृष्ट्या भूयो भूयो वयं नमस्कुर्मः ॥ १०० ॥

शार्ङ्गोद्याननिवासिनि! मानसवाक्कायकर्मभिर्विहितम् ।
सर्वं मयापराधं मातर्मे त्वं क्षमस्व कारुण्यात् ॥ १०१ ॥

शार्ङ्गोद्याननिवासिन्यम्बायाः पठति नुतिशतीमेताम् ।
भक्त्या यस्तस्य भवेत् कात्यायन्या निरङ्कुशा प्रीतिः ॥ १०२ ॥

॥ श्री ॥

## कल्याणस्तवः ।

कल्याणवृष्टिभिरिवामृतपूरिताभि-
र्लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः ।
सेवाभिरम्ब! तव पादसरोजमूले
नाकारि किं मनसि भक्तिमतां जनानाम् ॥ १ ॥

एतावदेव जननि! स्पृहणीयमास्ते
त्वद्वन्दनेषु सलिल(स्थगि?स्नपि)तेऽपि नेत्रे ।
सान्निध्यमुद्यदरुणायुतसोदरस्य
त्वद्विग्रहस्य परया सुधयाप्लुतस्य ॥ २ ॥

ईशित्वभावकलुषाः कति नाम सन्ति
ब्रह्मादयः प्रतिभवं प्रलयाभिभूताः ।
एकः स एव जननि! स्थिरसिद्धिरास्ते
यः पादयोस्तव सकृत् प्रणतिं करोति ॥ ३ ॥

लब्ध्वा सकृत् त्रिपुरसुन्दरि ! तावकीनं
कारुण्यकन्दलितकान्तिभरं कटाक्षम् ।
कन्दर्पभावसुभगाः खलु भक्तिभाजः
संमोहयन्ति तरु(णी भु१णीर्भु)वनत्रयेऽपि ॥ ४ ॥

ह्रीङ्कारमेव तव नाम गृणन्ति वेदा
मातस्त्रिकोणनिलये ! त्रिपुरे ! त्रिनेत्रे ! ।
यत्संस्मृतौ यमभटाभिभवं विहाय
दी(व्य१व्य)न्ति नन्दनवने सह लोकपालैः ॥ ५ ॥

हन्तुः पुरामधिगळं परिघूर्णमानः
क्रूरः कथं नु भविता गरळस्य वेगः ।
नाश्वासनाय यदि मातरिदं तवार्धं
देहस्य शश्वदमृताप्लवशीतळस्य ॥ ६ ॥

सर्वज्ञतां सदसि वाक्पटुतां प्रसूते
देवि ! त्वदङ्घ्रिसरसीरुहयोः प्रणामः ।
किञ्च स्फुरन्मकुटमुज्ज्वलदातपत्रं
द्वे चामरे च महतीं वसुधां ददाति ॥ ७ ॥

कल्पद्रुमैरभिमतप्रतिपादनेषु
कारुण्यवारिधिभिरम्ब ! भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि ! मामनाथं
त्वय्येव भक्तिभरितं त्वयि दत्तदृष्टिम् ॥ ८ ॥

हन्तेतरेष्वपि निधाय मनांसि चान्ये
भक्तिं वहन्ति किल पामरदैवतेषु ।
त्वामेव देवि ! मनसाहमनुस्मरामि
त्वामेव नौमि शरणं जननि ! त्वमेव ॥ ९ ॥

लक्षेषु सत्स्वपि तवाक्षिविलोकिताना-
मालोकय त्रिपुरसुन्दरि ! मां कथञ्चित् ।
नूनं मया तु सदृशः करुणैकपात्रं
जातो जनिष्यति जनो न च जायते वा ॥ १० ॥

ह्रीं ह्रीमिति प्रतिपदं जपतां तवाख्यां
किं नाम दुर्लभमिह त्रिपुराधिवासे ! ।
मालाकिरीटमदवारणमाननीयां
(न्त्वत्सेवते॑त्वां सेवते) वसुमती स्वयमेव लक्ष्मीः ॥११॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानकुशलानि सरोरुहाक्षि ! ॥
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्यम् ॥ १२ ॥

कल्पोपसंहृतिषु कल्पिततांण्डवस्य
देवस्य खण्डपरशोः परभैरवस्य ।
पाशाङ्कुशैक्षवशरासनपुष्पबाणा
सा साक्षिणी विजयते तव मूर्तिरेका ॥ १३ ॥

लग्नं सदा भवतु मातरिदं त्वदीयं
तेजःपरं बहळकुङ्कुमपङ्कशोणम् ।
भास्वत्किरीटममृतांशुकलावतंसं
मध्यत्रिकोणमुदितं परमामृतार्द्रम् ॥ १४ ॥

ह्रीङ्कारमेव तव धाम तदेव रूपं
तन्नाम सुन्दरि ! सरोजनिवासशीले ! ।
यत्तेजसा परिणतं वियदादिभूत-
जातं तनोति सरसीरुहसम्भवादि ॥ १५ ॥

ह्रीङ्कारत्रयसम्पुटेन महता मन्त्रेण सन्दीपितं
स्तोत्रं यः प्रतिवासरं तव सदा मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः ॥१६॥

---

॥ श्री ॥

# ॥ केशवाष्टकम् ॥

[ स्तोत्रमिदम् एतद्ग्रन्थशालीये १८२२९ तमे ग्रन्थे 'E' इत्यङ्काङ्कितम् । ]

यदुपायतः सकलभूभुजां वरा
  यदुपा भवन्ति बलवीर्यशालिनः ।
तमसाभिभूतजनदुःखदाहिनं
  तमघौघनाशनमुपैमि केशवम् ॥ १ ॥

अवनीतलार्तिकरदुष्टशान्तये
  नवनीत(हारक)शिशुत्वमागतः ।
यवनेशघातिनमुपायकौशलात्
  पवनाशशायिनमुपैमि केशवम् ॥ २ ॥

शिशुपालरूक्षपरिहासवाक्शर-
  व्रणशान्तये तदनु शुद्धसर्पिषा ।
परिषिच्यमानहृदयं महाहवे
  परवीरघातिनमुपैमि केशवम् ॥ ३ ॥

शशिवंशजातवसुदेवनन्दनं
  शशिशेखरादिसुरवृन्दवन्दितम् ।
शशिवैरिकृन्तनकरारिधारिणं
  शशिमण्डलाननमुपैमि केशवम् ॥४॥

द्विपराजवाहनगृहाङ्कणाद्भलाद्-
द्रुमराज(वाऽहा)रिणमशेषनाकिनाम् ।
अपराजितं सकललोकनायकं
कपिराजकेतुसखमेमि केशवम् ॥ ५ ॥

परिवारभूतगुहनन्दिशोभिने
पुरवैरिणे समरतृप्तिदायिनम् ।
वरवारणायुतबलानुजात्मनः
कुरुवीरजस्य गुरुमेमि केशवम् ॥ ६ ॥

अरुणारविन्ददलचारुलोचनं
करुणाकरं कनकरत्नभूषितम् ।
अरुणानुजध्वजमपारभूतिदं
शरणागतस्य तनुवैमिं केशवम् ॥ ७ ॥

पुरुषं पुराणमजरं जगन्मयं
हरिमिन्दिरापतिमनन्तमच्युतम् ।
परमं परायणमचिन्त्यमक्षरं
परिपूर्णमेकमजमेमि केशवम् ॥ ८ ॥

य इदं पठेन्म (हतिऽनसि) केशवाष्टकं
हरिभावनामृतरसार्द्रभावनम् ।
स विहाय जन्ममरणादिसंसृतिं
परमं प्रयास्यति पदं सनातनम् ॥

# *श्रीकृष्णदण्डकम्

वृन्दावने शिशिरमन्दानिलाचलित-
कुन्दादिसूनसुविकासे
वन्दिबहुमुनिपरिषदिन्द्रमुखविबुधवर-
वृन्दपशुपशुपमिळिताशे ।
मणिपल्लवस्तबकसुरशाखिमूलगत-
कनकारविन्दपुटदेशे
परिलसितमसितनवजलदकुलतुलितरुचि
मुरमथनवपुरिदमुपासे ॥ १ ॥

व्यालोलपिञ्छवलयालम्बिसंयमित-
लोलम्बनीलकचपाशं
बालशशिरुचिरतरफालतलधृततिलक-
मालसिततिलकुसुमनासम् ।
मृदुगण्डसश्चलितमणिकुण्डलं चटुल-
करुणावलोकनविलासं
मधुरलसदधरपुटपरिनिहितकळमुरळि
दशनरुचिविशदमृदुहासम् ॥ २ ॥

ताराळितारुचिहारावलीवलयि-
तोरोविलोलवनमालं
ताररवमणिवलयहारिपृथुभुजयुगळ-
दूरलसदमलनजखालम् ।

---

* श्रीकृष्णस्तवात्मकमिदं दण्डकं 154 अङ्काङ्किते ग्रन्थे विद्यमानं केरळीयलिपिलिखितम् अज्ञातकर्तृकं च ।

तरळाङ्गुलीगळितमुरळीनिनादरस-
शिशिरीकृताशमनुवेलं
तनुविलसदुदरतलमनुपमितजघनभर-
परिघटिततटिदुपमचेलम् ॥ ३ ॥

शिञ्जानहेममणिकाञ्चीकलापगुण-
संजातभङ्गि परिपिङ्गं
चारुपृथुमसृणलसदूरुयुगमुपलसित-
जानुयुगमतिसुभगजङ्घम् ।
मणिनूपुराकलितचरणाम्बुजोल्लसित-
नखपङ्क्तिकान्तिजितशङ्खं
व्यतिनिहितपदयुगळमरुणतरचरणतल-
मुरुमहिमनिलयमकळङ्कम् ॥ ४ ॥

---

॥ श्रीः ॥

# ॥ कुमारस्तवः ॥

---

अव्यादपारकरुणं तरुणारुणाभ-
मव्याजसुन्दरमनन्तगुणाभिरामम् ।
अम्भोजशक्त्यभयकुक्कुटशोभिहस्त-
मम्बातपःफलमपत्यमिहैश्वरं नः ॥ १ ॥

आचार्यमागमरहस्यमहामनूना-
माचान्तवारिनिधिदेशिकमाम्बिकेयम् ।
आखण्डलाद्यमरवन्दितमात्मरूप-
मालम्बते मम मनः शरणं कुमारम् ॥ २ ॥

इन्दीवरायतविलोचनमिन्द्रसेना-
नेतारमिन्दुमुखमिन्दुकलावतंसम् ।
इन्द्रानुजार्चित(महर्निश)मिन्दिराया
जामातरं हृदयमिङ्गतु मे कुमारम् ॥ ३ ॥

ईशानधर्मसुतमीश्वरमीश्वराणा
मीशित्वमुख्यफलदं गतिमीयुषः स्वम् ।
ईहानुजातजगदण्डकमीक्षितार-
मीडेऽहमीप्सितसुपर्वतरुं कुमारम् ॥ ४ ॥

उद्यन्निशारमणवक्त्रमुपेन्द्रकन्या-
मुद्दोद्धमादृतमनोज्ञपुलिन्दवेषम् ।
उन्मूलनार्थमुररीकृतदिव्यरूप-
मुद्वृत्तदैत्यविततेरुपयामि देवम् ॥ ५ ॥

ऊरीकृतस्वचरणैकपरायणं तं
दूरीकृतात्मविमुखात्मजनं भजामः ।
ऊहस्वरूपमुपगीतमकृत्रिमाणां
मूर्धस्थितैरपि गिरां वचनैः कुमारम् ॥ ६ ॥

ऋक्सामवर्णितपदं यजुषानुगीत-
मृष्यादियुक्तनिजमन्त्रजपैकतानान् ।
(ह?ऋ)द्धास्पदं गमयितारमृतस्वरूप-
मृच्छाम्यहं शरणमात्मजमिन्दुमौलेः ॥ ७ ॥

एकान्तभक्तिसुलभं जगदेकनाथ-
मेकातपत्रविभवप्रदमाश्रितानाम् ।
एकाग्रगम्यपदमेकरदानुजात-
मेधामहे शरवणोद्भवमेयिवांसः ॥ ८ ॥

ऐश्वर्यसिद्धिमथवा सुखमैहिकं वा-
प्यैकाधिपत्यमवनेरपि वामरत्वम् ।
ऐतुं यदीच्छसि मनः! शरणं भजेथा
ऐशानमङ्गजमुमागुरुभागधेयम् ॥ ९ ॥

ओङ्कारमन्त्रपदवाच्यमजं वदन्त-
मोजोमदादपरथा प्रविवेश्य काराम् ।
लोकान् ससर्ज निखिलान् निजयैव शक्त्या
यो योगिनं तमजरं गुहमाश्रयामः ॥ १० ॥

औदार्यवारिनिधिमास्पदमौचितीना-
मौद्धत्य(पद्ध?वद्दि)तिसुतौघभिदापटिष्ठम् ।
औन्नत्यमाशु ददतं सकृदानताना-
मौपम्यहीनचरितं गुहमानमामः ॥ ११ ॥

कल्याणभूमिधरकार्मुकपुण्यपाकः
कन्दर्पकोटिकमनीयकलेबरश्रीः ।
कल्पद्रुकल्पकरकल्पितशक्तिशाली
कामान् ममाशु सफलीकुरुतां कुमारः ॥ १२ ॥

खेदं परित्यज मनः! खलसेवनोत्थं
खेलाशु खण्डपरशोः सुकृते कुमारे ।
खेलाविधूतखलदानवयूथपोऽयं
खेदं न जातु सहते स्वपदाश्रितानाम् ॥ १३ ॥

गाङ्गेयकुङ्कुमजपारुणचारुगात्रं
गङ्गाधराननसरोजसरोजबन्धुम् ।
गाङ्गेयमाश्रय मनो! बहुचिन्तयालं
गङ्गातरङ्गवदयं श्रिततापहारी ॥ १४ ॥

घोरालिकार्पितालिपि(र्वि)धिने(यि? ति) चेतो
घूर्णस्यजस्रमयि! किं गुहमाश्रयेथाः ।
घूकं दिनेश इव कोटरमेष देवः
कारागृहान्तमनयत् खलु तं विरिञ्चम् ॥ १५ ॥

ङित्प्रत्यये सति परे गुणवृद्ध्यभावः
स्यात् सार्वधातुकपिता यदि न व्यवायः ।
जन्तोः कथं बलवती विधिदुर्लिपिः स्यात्
सर्वातिगो यदि गुहो हृदयं प्रविष्टः ॥ १६ ॥

चक्रायुधप्रियसुतामुखचञ्चरीक-
श्चन्द्रावतंसिचरणायुधचारुहस्तः ।
चेतो भवानिकुचकोरकपूर्णचन्द्र-
श्चित् ते चकास्तु धृतचन्द्रकभृत् कुमारः ॥ १७॥

छिन्नाखिलाघशमले स्वपदाश्रितानां
छायातरौ भवमहोष्मविशोषितानाम् ।
छन्दानुरूपफलदे सुरसैन्यनाथे
छन्दोमये मम मनो रमतां नितान्तम् ॥ १८॥

जानामि धर्ममयि! तत्र न तु प्रवर्ते
जानाम्यधर्ममपि नैव ततो निवर्ते ।
जानासि सर्वहृदयं जगदन्तरात्मन्!
जातं ममापचरितं सकलं क्षमेथाः ॥ १९॥

ज्ञाताखिलागमरहस्यतमार्थमेतं
ज्ञात्वा समाश्रय गुहं शरणं शरण्यम् ।
ज्ञानं ददीत तदयं हृदयाशु तुभ्य-
मेवविधो न भविता तव येन मोहः ॥ २०॥

झञ्झासमीरणमघौघघनच्छटानां
सिद्धौषधं भवमयामयविह्वलानाम् ।
चिन्तामणिं प्रणमतां करुणाम्बुराशिं
गौरीसुतं गुहमहं शरणं प्रपद्ये ॥ २१ ॥

टङ्कायमाननिजकोपमशेषलोक-
बाधा(करा)सुरमहोपलजालकानाम् ।
क्रौञ्चाद्रिभेदपरिगुप्तसमस्तलोक-
मञ्चामि किञ्चन हृदा शिवभागधेयम् ॥ २२॥

डृत्कारमाशु परिपातय तं कठोरं
मद्वैरिकण्ठकुहरेषु गुहाविषह्यम् ।
यः प्रागुदस्थित भवद्भुजशक्तिविद्ध-
क्रौञ्चाद्रिभेदसमये दितिजाद्रिवज्रः ॥ २३ ॥

डम्भापहारिचरितं दनुजेश्वराणां
जम्भारिराज्यदमडम्भजनानुकूलम् ।
सम्भावयामि शरकाननसम्भवं तं
पक्वं फलं हृदि पुरारिपुराकृतानाम् ॥ २४ ॥

ढक्के समस्तहृदयाब्जगुहाशयं तं
पश्यामि पातकमहागजपञ्चवक्त्रम् ।
पञ्चायुधारिमृदुलाङ्ककृताधिवासं
क्रौञ्चारिमद्य शरणं मनसा शरण्यम् ॥ २५ ॥

णान्तं वनं भवति मानस(यश्च)त्वरं चेत्-
तस्मिन् सरस्तदुदरे कमलं तदन्तः ।
किञ्चिन्महाश्विनवषड्युगवक्त्रदृग्दो-
स्तद्भेषजं भवरुजो भज गुह्यमेतत् ॥ २६ ॥

तत्कालतप्ततपनीयमयं किरीटं
ताराधिपार्धमणिमौक्तिकशोभितान्तम् ।
तारावलीशशिपरीवृतमेरुशङ्कां
तन्वत् तनोतु कुशलं मम तारकारेः ॥ २७ ॥

स्थेयः शिवं दिशतु मे स्थिरधन्वसूनोः
कोटीरनद्धनवरत्नमरीचिविद्धम् ।
इन्द्रायुधोपमितमिन्दुकलावदातं
लोलम्बलोलदलकोल्लसितं ललाटम् ॥ २८ ॥

दैन्यं ममापहरतां दहनोद्भवस्य
कारुण्यवेल्लननियन्त्रितसर्वलकम् ।
दिव्यं भ्रुवोर्युगलमीषदरालरम्यं
दूरास्तदर्पकशरासनदर्पभारम् ॥ २९ ॥

धून्वन्तु मे दुरितमाशु दिशन्तु सौख्यं
धीरस्य धूर्जटिसुतस्य कटाक्षमालाः ।
धूतारविन्दरुचयः करुणामरन्द-
धारातिमात्रशिशिराः कमलानिवासाः ॥ ३० ॥

नासापुटं नलिननाभसहोदरस्य
नासीरनेतुरनिशं कुशलानि कुर्यात् ।
निम्नोन्नतं नवतिलप्रसवाभिरामं
नीचैस्तरीकृतसुचम्पककोरकाभम् ॥ ३१ ॥

पातां परस्परसमौ गुरुपद्मराग-
पाषाणदर्पणसमानरुची कपोलौ ।
पर्यन्तलम्बिमणिकुण्डलमण्डितान्तौ
पाटीरशैलपवमानसखारिसूनोः ॥ ३२ ॥

फुल्लारविन्दसदृशं फलतु श्रियं मे
फालान्तलोचनभवस्य मुखं प्रसन्नम् ।
स्फारस्फुरद्दशनमौक्तिकमन्दहासं
श्मश्रुप्ररोहमधरोष्ठपुटप्रवालम् ॥ ३३ ॥

बर्हीन्द्रकेतनरतस्य मुखाब्जनालो
बुद्धिप्रदोऽस्तु शुभदो मम कम्बुकण्ठः ।
बन्धूकवर्णरुचिभिन्नरुचिप्रवाल-
बन्धूभवद्विशदमौक्तिकहारहारी ॥ ३४ ॥

भद्राङ्कभद्रतनयस्य भुजा भवेयु-
भद्राय मे भुवनरक्षणजागरूकाः ।
भास्वत्सुवर्णवलयाङ्गदकाङ्गुलीया
भक्ताखिलेष्टफलदानसुरद्रुशाखाः ॥ ३५ ॥

मन्दारमाल्यमकरन्दमिलद्द्विरेफ-
मालामनोहरमुरो हरनन्दनस्य ।
माङ्गल्यमावहतु माधवकन्यकाया
माणिक्यहारिकुचकुङ्कुमपङ्कशोणम् ॥ ३६ ॥

यज्ञेश्वरस्य यजमानतनोर्गुहस्य
योगेश्वरस्य जठरं जगतां निधानम् ।
युक्तेन योजयतु मां त्रिवलीविरूढ-
रोमावलीलसितवृत्तगभीरनाभम् ॥ ३७ ॥

रत्नानुविद्धरमणीयसुवर्णकाञ्ची-
रेखापिनद्धकनकान्तदुकूलकान्तम् ।
रामावलीहृदयसंवननं सदा मां
रक्षेत् पुलिन्दरमणीरमणस्य मध्यम् ॥ ३८ ॥

लक्ष्मीविलासभवनं कदलीकमेत-
ल्लीलानुकारि (ललितराम? ललितान्तर)मूरुयुग्मम् ।
लावण्यशालि लघयेन्मम दैन्यभारं
लोकोत्तरस्य ललिताकुलनन्दनस्य ॥ ३९ ॥

वाचामगोचरमनोहरवा(ग? म)रूपं
वामार्धजानिजनुषः किल जानुयुग्मम् ।
वन्दे वरेण्यमणिदर्पणमञ्जुवृत्तं
वन्दारुवाञ्छितवरप्रददिव्यरत्नम् ॥ ४० ॥

शम्भोः सुतस्य शतपत्रशरासतूणी-
शङ्कावहे शबरराजसुताभिकस्य ।
शश्वत्(क)राब्जमृदिते शतमन्युपुत्र्या
शृङ्गारिते शमयतां शमलं सुजङ्घे ॥ ४१ ॥

षड्युग्मषड्भुजमुखस्य पदारविन्दे
षड्वैरिवर्गशमने मम जीव एषः ।
षड्भिः समेत्य करणैः सह षट्पदत्वं
षट्पङ्कजोपरि गतो रमतां सुखेन ॥ ४२ ।

स्कान्दं सदा स्फुरतु मे मनसि स्वरूपं
सर्वाङ्गसुन्दरतरं सरसं समग्रम् ।
सच्चिन्मयं सकलसत्त्वहिते निविष्टं
साक्षात्सदाकृतसदाशिवभागधेयम् ॥ ४३ ॥

हेरम्बसोदर! हिरण्मयकुण्डलाय
हेमाङ्गदाय हिमशैलसुतासुताय ।
हेतोः समस्तजगतां हितचाष्टिताय
हे शूरपद्मकुलकाल! नमो नमस्ते ॥ ४४ ॥

क्षोणीधरक्षितिपभूरमणान्ववाय-
क्षीरार्णवोदर(दरव? भव)क्षणदाकरेण ।
क्षन्तव्यमेव भवता गुह! साहसं मे
क्षुद्रस्य तावकगुणस्तवनाय जातम् ॥ ४५ ॥

श्री

# ॥ सुवर्णमुक्तावलीस्तुतिः ॥

[स्तुतिरियम् आदिक्षान्तवर्णावल्या समारब्धत्वाच्चारुवर्णकलितत्वाच्च द्वेधा सार्थनाम्नी T. 68 अङ्काङ्कितात् प्रतिरूपितग्रन्थादुद्धृता । इतः पूर्वम् Vol. X, No. 4 तमे पुस्तके मुद्रितः कुमारस्तवोऽपि एतस्मादेव ग्रन्थादुद्धृतः । उभयोरप्यनयोर्नितरामस्ति सादृश्यमित्युभावप्येतावेकस्यैव कवेः प्रतिभाविलास इति भाति ।

अद्वैतमक्षरमनन्तमभक्तलोकै-
रज्ञेयतत्त्वमनुमेयमतीन्द्रियज्ञैः ।
अव्यक्तमर्चयदनुग्रहणात्तरूप-
मन्तःपुरं पुररिपोररुणं भजामः ॥ १ ॥

आताम्रमात्तधनुरङ्कुशपाशबाण-
मादर्शनिर्मलकपोलकमायताक्षम् ।
आनन्दचिन्मयमहः स्तुतमागमान्तै-
रार्याख्यमार्तिहरमाशु ममान्तरास्ताम् ॥ २ ॥

इन्द्रादिदिव्यपददामियतीत्यमेया-
मिन्दीवराक्षियुगलीमितिहासवेद्याम् ।
इन्दुप्रकाशवदनामिभराजयाता-
मिष्टार्थदां भगवतीमिह चिन्तयामि ॥ ३ ॥

ईशित्वमुख्यफलदां जगदीश्वरीं ता-
मीशानवामनिलयामियतीदृशीति।
ईक्षावतामविषयं महदीहिताङ्घ्रि-
मीडे परां सुरगवीमहमीप्सितानाम्॥४॥

उन्निद्रपङ्कजमुखीमुदितारुणाभा-
मुद्वृत्तपीवरकुचामुपगीयमानाम्।
उच्चैस्तरामुपनिषाद्भिरुपासकाना-
मुच्चावचेष्टफलहेतुमुमामुपासे॥५॥

ऊरीकृतात्मचरणार्पितचित्तवृत्ति-
मूर्ध्वस्थितां निगममौलिभिरूह्यमानाम्।
ऊनेतरार्थफलदां परमेश्वरोढा-
मूढत्रिलोकभरणां जननीं प्रपद्ये॥६॥

ऋग्भिर्यजुर्भिरपि सामभिरर्चकाना-
मृद्धिप्रदाननिरतामृतुहूयमानाम्।
ऋत्विग्भिरध्वरमयीमृतसत्यनेत्रा-
मृज्वीमृभुक्षमहितामनुसन्दधामि॥७॥

एकान्तभक्तिसुलभामतिमात्ररम्या-
मेकातपत्रफलदां सकृदर्चकानाम्।
एतादृशीत्यविदितां निगमावलीभि-
रेकामनेकजननीं वयमाश्रयामः॥८॥

ऐक्यं त्वया सह महेश्वरि! लब्धुकामा
नैकाधिपत्यमवनेरपि कामयन्ते।
ऐश्वर्यसिद्धिमतुलामपि याचमानो
जिह्रेमि केवलमहं सुखमैहिकं त्वाम् ॥ ९ ॥

ओतं समस्तभुवनं यदमेयशक्त्या-
वोजस्वि भाति कलयन्ति तपांसि यस्याम्।
ओकोऽप्ययातुमनसः समुपास्महे ता-
मोङ्कारदिव्यकमलाकरराजहंसीम् ॥ १० ॥

औदार्यमाश्रितजनेषु तवातिमात्र
औपम्यहीनमिति सर्वजग(त्य?त्प्र)सिद्धम्।
औचित्यमम्ब! किमिदं यदुपेक्षसे मा-
मौर्वाग्निदुर्विषहदैन्यविदूयमानम् ॥ ११ ॥

कल्याणमावहतु मे कमलाविरिञ्च-
कान्ताकरान्तधृतचामरशोभिपार्श्वम्।
कल्याणशैलनिलयं किमपि स्वरूपं
कोदण्डबाणसृणिपाशकरारविन्दम् ॥ १२ ॥

खेलन्तु मे मनसि खेचरमौलिमाला-
लोलन्मणीकिरणरञ्जितपादुकायाः।
पादाब्जरेणुकणिकाः परदेवताया
वोढुं शिवः शिरसि या हि बिभर्ति गोत्रम् ॥ १३ ॥

गङ्गाधरप्रणयिनीचरणारविन्दे
श्रृङ्गारकन्दलितकान्तिझरीमरन्दे ।
भृङ्गायतां मम मनः पुरुषार्थकन्दे
तुङ्गानुभाविनि मिलन्मुनिहंसबृन्दे । १४ ॥

घर्मान्तकालजलमुक्पटलीधुरीणे
घोरामयानिलदवानलतापभाजाम् ।
यस्त्रागमे प्रणतमोहतमस्ततीना-
मङ्घ्रिद्वये लगतु मे हृदयं शिवायाः ॥ १५ ॥

ङ्यावन्तवाच्यमितरच्च समस्तमेतद्
यस्या विभाति कलया समनुप्रविष्टम् ।
तस्यामनन्तसुखचिन्मयविग्रहायां
लीये गिरीशगुरुभाग्यपरम्परायाम् ॥ १६ ॥

चन्द्रार्धशेखरमिनेन्दुहुताशनेत्रं
चारुस्मितास्यमरुणं परमाणुमध्यम् ।
चामीकराभरणमुच्चकुचं मनोज्ञं
चित्ते चकास्तु तरुणं शिवकामि तेजः ॥ १७ ॥

छायामहीरुहि भवोष्रमार्गभाजां
छायाविधूतकुरुविन्दमणिप्रभायाम् ।
छायेव सज्जतु मणौ मम चेतनेयं
त्रैलोक्यमातरि महेश्वरवल्लभायाम् ॥ १८ ॥

जन्तोर्ललाटलिखितापि लिपिर्विधात्रा
जन्मान्तराचरितपातकसूचयित्री ।
जायेत दिव्यसुखदा यदपाङ्गदृष्ट्या
जायामुमां पुरभिदो हृदि मन्महे ताम् ॥ १९ ॥

झञ्झामरुद्भिरिव दुस्सहमेघमेलाः
शीर्यन्ति सर्वविपदः करुणाकटाक्षैः ।
यस्याः सकृत् प्रणतमातृपदाम्बुजाय(?)-
स्तां सर्वलोकजननीं शरणं प्रपद्ये ॥ २० ॥

ञिघ्ष्फडीषु विहितासु कतप्रकृत्या
यद्रूपमुल्लसति तत् खलु नाम यस्याः ।
ज्ञानप्रदं सकलरोगहरं पवित्रं
तां भावयामि मनसा हिमशैलकन्याम् ॥ २१ ॥

टङ्कायते विपुलपापमहोपलानां
यस्याः सकृच्चरणयोर्विहितः प्रणामः ।
तामाश्रये सुखकरीं जगतां त्रयाणां
निश्शेषदुःखशमनाय सतीं भवानीम् ॥ २२ ॥

ठङ्कारकल्पमणिमध्यविराजमान-
ताटङ्करत्नयुगलायितपुष्पवत्साम् ।
देदीप्यमानमणिदर्पणतुल्यगण्डां
कामेश्वराङ्कनिलयां प्रणमामि गौरीम् ॥ २३ ॥

डोलायमानमनसां बहुचिन्तयालं
दारिद्र्यदुःखभवया भविनां यदीये ।
पादाम्बुजन्मनि रतिः सुरशाखिशाखा
सा पार्वती शरणमद्य ममास्तु देवी ॥ २४ ॥

ढक्काधरस्य नटतो नटनायकस्य
नृत्तानुकारचतुरां चतुरास्यनूताम् ।
आपन्नभक्तजनरक्षणजागरूका-
मम्बां भजे नतमनोरथकल्पवल्लीम् ॥ २५ ॥

णिङ्प्रत्ययोऽनुवदति प्रकृतेरिवार्थं
सृष्टिस्थितिक्षयकृतौ मिलनेन यस्याः ।
सृष्टिस्थितिक्षयविधीन् विदधाति शम्भु-
स्तस्यै नमः प्रकृतये भुवनैकगत्यै ॥ २६ ॥

तन्वी तटित्तनुलता तरुणेन्दुवक्त्रा
तारुण्ययोगललिता तरलायताक्षी ।
ताम्राधरा तरलहारकुचान्तराला
तापापहा भगवती भवतात् पुरस्तात् ॥ २७ ॥

थुट् सस्य सन्निव परस्य परोपकाराद्
यत्सेवकस्य निटिलोपरि चन्द्रखण्डः ।
आगच्छति प्रणतवाञ्छितकल्पवल्ली-
माराध्महे मनसि हैमवतीं कुमारीम् ॥ २८ ॥

दीनावनैकनिरतां भुवनाधिपत्य-
दानप्रवीणचरणाम्बुरुहोपहाराम् ।
देवीं दयार्द्रनयनां दधतीमुपासे
पाशेक्षुचापसुमबाणसृणीन् कराब्जैः ॥ २९ ॥

ध(न्यां कुऽन्यं य)शस्यमतिपावनमामयघ्नं
धैर्यावहं सुखकरं भवरोगहारि ।
धामप्रदं भयहरं चरितं यदीयं
धात्री धराधरसुता मम सा प्रसीदेत् ॥ ३० ॥

नामावली नयति कीर्तयतो यदीया
नाकं नरानधिकदुष्कृतकारिणोऽपि ।
नारायणस्य सहजां सहजार्द्रभावां
नाथामि तां शुभगतिं नगराजपुत्रीम् ॥ ३१ ॥

पञ्चास्यमञ्चनिलयां परमात्मरूपां
पञ्चोपचारसरसां परिपूर्णकामाम् ।
पञ्चायुधाभयकरीं परचित्प्रकाशां
पञ्चापहारिचरितां गिरिजामुपासे ॥ ३२ ॥

फुल्लारविन्दवदने ! फलदे ! क्रियाणां
फालेक्षणार्जितसुकर्मफलस्वरूपे ! ।
कल्हारगन्धचिकुरे ! कुरुविन्दशोभे !
कारुण्यशालिनि ! विलोकय मामपाङ्गैः ॥ ३३ ॥

बालामृतांशुकलिकापरिशोभिफाले !
बालारुणारुणशरीरमरीचिमाले ! ।
त्रैलोक्यपालिनि ! विलोकयितुं शिवे ! मां
कालोऽयमेव करुणाशिशिरैः कटाक्षैः ॥ ३४ ॥

भद्राणि पश्यति भवत्य(पिको?धिपे,)जगत्यां
भग्नो न जातु न बिभेति कुतश्चनायम् ।
भाग्येन योऽत्र भजते तव पादपद्मं
भक्तिर्दृढा भवतु मे त्वयि भक्तवश्ये ! ॥ ३५ ॥

मातङ्गमञ्जुलगते ! महनीयमूर्ते !
मन्दारवल्लि ! भजतां मनसाधिगम्ये ! ।
माये ! महेश्वरविलासिनि ! मा तनिष्ठा
मायामहासरिति मज्जति मय्युपेक्षाम् ॥ ३६ ॥

या विश्वमात्ममहसा समनुप्रविष्टा
यामेव सर्वमनुयाति यया विभाति ।
यस्यै करोति समुदेति यतश्च रूपं
यस्या लयं व्रजति यत्र(च)सा त्वमेव ॥ ३७ ॥

राजा ( विभा?पि दा )सति भवानि! कटाक्षति श्री
राजानति श्रितजनो(रचनायि?रसनाति)वाणी ।
रामा रमान्ति खलु देवति देवि गेहं
त्वत्सेवकस्य नहि किं मयि वस्तु किं वा ॥ ३८ ॥

लक्ष्यीकुरुष्व ललिते ! ललितैः कटाक्षै-
लक्ष्मीकरैर्झटिति मां लघया(तु?शु) दैन्यम् ।
लोकप्रसिद्धमहिमावलिलाघवं ते
मा भूदयं तव जनो भुवि सीदतीति ॥ ३९ ॥

वाचस्पतिर्भवति मूकतमोऽपि पङ्गु-
र्वारान्निधींस्तरति दर्शयतेऽह्नि तारम् ।
अन्तेऽपि नाकमघवानतियाति देही
यत्पात्रमम्ब ! तव तं दिश मय्यपाङ्गम् ॥ ४० ॥

शंसन्ति शङ्करि ! शशाङ्ककलावतंसे !
शास्त्राणि सर्वजगतां भवतीं सवित्रीम् ।
शङ्कां विनायमघवानतिभक्तवन्मा-
मालोकयाम्ब ! समर्था हि सुतेषु माता ॥ ४१ ॥

षड्गोऽपि साधुविमुखोऽपि षडास्यमातः !
षड्वैरिवर्गपरिभूतषडिन्द्रियोऽपि ।
षट्पङ्कजोपरिगते ! भवतीं प्रपन्नः
षट्कर्मगम्यपदमाश्रयते जनुष्मान् ॥ ४२ ॥

सत्त्वं रजस्तम इति प्रकृतेर्गुणैस्ते
सर्गस्थितिप्र(भव?लय)संस्थितहेतुभूतैः ।
स्रष्टाविभुप्रभृतयो न विदुः स्वरूपं
सत्यं तवाम्ब ! नुतये भुवि कोऽलमन्यः । ४३ ॥

हालामदारुणिमहारिहनुप्रदेशे !
   हालाहलाशनसुखावहदिव्यमूर्ते ! ।
हर्यश्वमुख्यहरिदीशनुतेऽम्ब ! मास्मान्
   हासीस्त्वदेकशरणानतिदीनभावान् ॥ ४४ ॥

क्षित्यादिभूतमयि ! किञ्चिदपि त्वदिच्छां
   क्षेत्रज्ञरूपिणि ! विना चलितुं न शक्तम् ।
क्षन्तव्यमेव कृतमम्ब ! शुभाशुभं मे
   क्ष्माभृत्सुते ! पतिनिदेशकरा हि भृत्याः ॥ ४५ ॥

एतां मया विरचितां वरद ! 'सुवर्ण-
   मुक्तावलीं' तव मुदे जगदेकमातः ! ।
प्रत्यर्पयामि कृपया परिगृह्य कुर्या
   वक्षोजकुङ्कुमरसैः सरसां समग्याम् ॥ ४६ ॥

---

## IN THE PRESS

1. Bhojanakutūhala (Dietetics) of Raghunātha. Part. II.
2. Sarasvatīkaṇṭhābharaṇa (Grammar) of Bhoja with the commentary Hṛdayahāriṇī by Daṇḍanāthanārāyaṇa Part. V.
3. Prakriyāsarvasva (Grammar) by Nārāyaṇa Bhaṭṭa. Part. V.
4. Mīmāṁsāślokavārtika of Kumārilabhaṭṭa with the commentary Kāśikā by Sucaritamiśra. Part. IV.
5. Aṅkaṇaśāstra. (Jyotiṣa)
6. Bhāgavatacampū of Rāmapāṇivāda.
7. Karaṇottama (Jyotiṣa) of Acyuta with commentary.

## READY FOR THE PRESS.

1. Aitareyāraṇyaka (Veda) with the commentary Mokṣapradā of Ṣaḍguruśiṣya.
2. Kalaśacandrikā. (Tantra).
3. Twenty Prabandhas (Campus) of Nārāyaṇa Bhaṭṭa.